RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
अपां प्रवाहो गाङ्गोपि समुद्रं प्राप्य तद्रसः।
भवत्यवश्यं तद् विद्वान् नाश्रयेदशुभात्मकम्॥
कामन्दकीयनीतिसारः

कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखम्।
अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः॥
महा० शांति० 173/20

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥
स्वाध्याय एषां देवत्वं तप एषां सतामिव ।
मरणं मानुषो भावः परिवादो ऽसतामिव ॥
( महाभारत, वनपर्व - 313/50 )
न योनिर्नापि संस्कारो न श्रुतं न च सन्ततिः।
कारणानि द्विजत्वस्य वृत्तमेव हि कारणम्॥
महाभारत-वनपर्व

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

卐 वर्षम्-१४ 卐 अंकः-०५ ( ३१७ ) नवदेहली 卐 १ सितम्बरमासः २०२४तः १५ सितम्बरमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-१२

## देशस्य त्रयाणां केन्द्रीयसंस्कृतविश्वविद्यालयानां संयुक्त-तत्त्वावधाने तृतीयोत्कर्षमहोत्सवः आयोजितः

डॉ.अजयकुमारमिश्राः

नवदेहली। भारतीय-तकनीकी- शिक्षा-परिषद् ( एआईसीटी), वसन्तकुंज , देहली इत्यत्र केन्द्रीयसंस्कृत विश्वविद्यालयः, श्री लालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः, तथा राष्ट्रियसंस्कृत विश्वविद्यालयः, तिरुपति इत्येतेषां संयुक्त-तत्वाधाने स्वकीये तृतीयोत्कर्षमहोत्सवस्य उद्घाटनसत्रे भारतीय सर्वकारिवस्त्रमंत्रालयस्य



केन्द्रीयमंत्रिणा माननीयेन गिरिराजसिंहेन संस्कृतविद्वांसःविदुष्यश्च प्राच्यविद्याभूषणसम्मानेन संस्कृतसेवाव्रतीसम्मानेन च सभाजिताः। तेनोक्तं यत् संस्कृतं समस्तसमाजान् यावद्गच्छेत्। येन ते अपि संस्कृतम् अधीत्य उच्चस्थानं प्राप्तुं शक्नुयुः। समारोहस्य विशिष्टातिथिरूपेण समागतः श्री विरजेश-उपाध्यायः , अध्यक्षः (शासकीयः) श्रम-आजीविका-मंत्रालयः) उक्तवान् यत् संस्कृतं समाजस्य आधारः । संस्कृतेन समाजस्य कल्याणः संभवः।अतः संस्कृतशिक्षा सामाजिकान्दोलनस्य भागो भवेत् । कुलपतिः प्रो जी.आर .कृष्णमूर्तिः स्वागतभाषणे उक्तवान् यत् संस्कृतस्य उत्थाने येषाम् अद्वितीयं सक्रियं च योगदानम् अस्ति ते संस्कृतसेवानिमित्तं सम्माननीयाः। मुख्यातिथिः प्रो श्रीनिवास वरखेड़ी उक्तवान् यत् संस्कृतविश्वविद्यालयानां संख्या आधुनिकविश्वविद्यालयीयविद्यार्थिनां अपेक्षया न्यूना नास्ति । अतः भारतीय ज्ञान-परम्परायाः

शेषभागःचतुर्थपुटे

## केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरे सुसम्पन्नः संस्कृतसप्ताहकार्यक्रमः

पुरी। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरे 16-08-2024 तः 28-08-2024 यावत्संस्कृतसप्ताहसमारोहः समनुष्ठितः। 16-08-2024 तमे दिनाङ्के अस्य कार्यक्रमस्य उद्घाटनसमारोहे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः आचार्यकिशोरचन्द्रपाढीमहाभागाः मुख्यातिथिरूपेण छात्रान् उद्बोधितवन्तः। समारोहेऽस्मिन् आध्यक्ष्यं निर्व्यूढं परिसरनिदेशकेन आचार्यबनमालीबिश्वालमहोदयेन। तदनु विविधाः प्रतियोगिताः विद्यालयस्तरे महाविद्यालयस्तरे, विश्वविद्यालयस्तरे च समायोजिताः। एवं पुनः 28-08-2024 तमे दिनाङ्के संस्कृतसप्ताहसमारोहस्य सम्पूर्तिसमारोहः समायोजितः यत्र समेऽपि विजेतारः पुरस्कृताः। परिसरस्य निदेशकाः प्रो.बनमालीबिश्वालमहोदयाः कार्यक्रमस्यास्य आध्यक्ष्यं निरवहन्। अस्मिन्




कार्यक्रमे विविधज्ञानविमण्डिताः संस्कृतसुरभारतीसमुपासकाः संस्कृतसंस्कृतिपरायणाः नैके विद्वांसः पण्डिताश्च अतिथिरूपेण वक्तृरूपेण च उपस्थिताः आसन्। तत्र तिरुपतिराष्ट्रियसंस्कृतविश्वविद्यालयस्यकुलपतिचराः प्रो. हरेकृष्णशतपथिमहोदयाः, डॉ.राजेन्द्रप्रसादकेन्द्रीयकृषिविश्वविद्यालयस्य कुलाधिपतयः प्रो. प्रफुल्लकुमारमिश्रमहाभागाः, संस्कृतभारतीसंस्थायाः पूर्वाञ्चलक्षेत्रसम्पादकाः पण्डितनृसिंहचरणपण्डामहाशयाः, याजपुरविरजामण्डलपण्डितमहासभायाः सभापतयः पण्डितभूपतिभूषणमिश्रवर्याः तथा श्रीसदाशिवपरिसरस्य साहित्यविभागस्य प्राक्तन-प्राध्यापिकाः सुश्रीस्नेहनन्दामहोदयाः च प्रमुखाः आमन्त्रिता विद्वांसः, विदुष्यश्च आसन्। अवसरेऽस्मिन् उपस्थितानां समेषाम् अतिथानाम् अभिभाषणस्य अयमेव सारः आसीद् यत्-संस्कृतभाषा हि भारतस्य आत्मा वर्तते। अतः अस्याः भाषायाः प्रचारप्रसाराय सर्वविधः प्रयासः अस्माकं ध्येयं स्यात्। एतदर्थमस्माभिः

शेषभागःचतुर्थपुटे

## केन्द्रीयसंस्कृतविश्वविद्यालस्य भोपाल परिसरे संस्कृतसप्ताहमहोत्सवस्याऽयोजनं जातम्

भोपाल। केन्द्रीयसंस्कृतविश्वविद्यास्य भोपाल परिसरे ,अगस्तमासस्य चतुर्दशदिनाङ्कतः आरभ्य विंशतिदिनाङ्कं यावत् संस्कृतसप्ताहमहोत्सवस्याऽयोजनं जातम्। परिसरेण कार्यक्रमोऽयं नवदेहलीस्थस्य केन्द्रीयसंस्कृतविश्वविद्यास्य कुलपतिमहोदयानां संरक्षणे अनुष्ठितमभवत्। आयोजितस्याऽस्य संस्कृतसप्ताहमहोत्सवस्योद्घाटनसत्रम्, अगस्त मासस्य चतुर्दशदिनाङ्के आसीत्। उद्घाटनसत्रं भोपालस्थस्य



श्रीरामानन्दसंस्कृतमहाविद्यालस्य संस्कृतविभागस्य आचार्याः प्रो. रघिवीरप्रसादगोस्वामि महाभागानां मुख्यातिथित्वे केन्द्रीयसंस्कृतविश्वविद्यास्य भोपालपरिसरीय व्याकरणविभागीया ऽचार्याणां प्रो. सुवोधकुमारशर्ममहाभागानां सारस्वतातिथित्वे, केन्द्रीय संस्कृतविश्वविद्यास्य भोपालपरिसरीयव्याकरणविभागीयाऽचार्याणां प्रो. भारतभूषणमिश्राणां विशिष्टातिथित्वे तथा परिसरनिदेशकानाम्, प्रो.रमाकान्तपाण्डेयमहोदयानामाध्यक्ष्ये समनुष्ठितं जातम्।तदनन्तरम्, अगस्तमासस्य षोडशदिनाङ्के भोपालनगरस्य निखिलविद्यालयानां महाविद्यालयानां छात्राणां मध्ये

शेषभागःदशमपुटे

## संकल्पनादिवससमारोहः

पवमाननौटियालः

नवदेहली। 21.08.2024 ई. तमे दिनाङ्के दिल्लीस्थया देववाणी-परिषदा रमालये एकोनपञ्चाशत्तमः संकल्पनादिवससमारोहः समामानितः। श्रीपवमाननौटियाल - श्रीहितेशशौनकाभ्यां कृतेन अथर्ववेदीयमङ्गलाचरेण प्रारब्धेस्मिन् कार्यक्रमे ऋषिराजपाठकेन संकल्पनादिवसविषये प्रास्ताविकं प्रस्तुतम्। एतदनु देववाणीपरिषत्प्रबन्धकेन श्रीमता आनन्दवर्धनशुक्लेन स्वागतभाषणं कृतम्। अतः परं राष्ट्रकिङ्करपत्रसम्पादकेन श्रीमताविनोदबब्बरेण




ऋषिराजपाठकेन च अतिथीनां स्वागतं माल्यार्पणेन अङ्गवस्त्रप्रदानेन च कृतम्।

एतदनु मुख्यातिथित्वेन समागतेन श्यामाप्रसादमुखर्जीमहिलामहाविद्यालयस्य संस्कृत विभागे सहायकाचार्येण डॉ. घनश्यामयादवेन संस्कृतकाव्यपरम्परायाम् अवदानकाव्यानि इति विषयमाश्रित्य मुख्यातिथि भाषणं कृतम्। तेनावदानकाव्यानाम् अर्वाचीनत्वं प्राचीनत्वं चापि प्रतिपादितम्। तेनोक्तं यद् अवदानं कर्मवृत्तं भवति। तेन शताधिकानाम् अवदानकाव्यानामुल्लेखः कृतः। एतदनन्तरं कविसमवायः समारब्धः।तत्रादौ श्रीमता दण्डपाणिना (दिल्लीविश्वविद्यालये कलानिष्णातसंस्कृतप्रथमवर्षीयेण) गोभ्यर्थना द्वादशी इति शिखरिणीच्छन्दसि काव्यं पठितम्। तेन गवां दुर्दशा, तासां मनोभावः, मनुष्यान् प्रति च करुणकथासंवेदना प्रकटितम्।

तदनु आत्मारामसनातनधर्ममहाविद्यालये संस्कृतविभागं सेवमानेन सारस्वतातिथिना डॉ. सर्वेशकुमामिश्रेण चामुण्डाशतकात् भवानीशतकाच्च कानिचन पद्यानि श्रावितानि।

# धिषणापरिषदः उपक्रमः प्रशंसनीयः -कुलपतिः प्रो.हरेरामत्रिपाठी

-डॉ.रेणुकाबोकारेः

रामटेक। चत्वारिंशत्यधिकद्विसहस्रतमसंवत्सरस्य ऑगस्टमासस्य सप्तदशदिनाङ्के कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये धिषणापरिषदः २०२४-२५ इति नवीनशैक्षणिकसत्रस्य प्रथमाधिवेशनं समजायत। तत्र च चत्वारश्छात्राः स्ववाक्कौशलं प्रास्तोषत।

धिषणापरिषदः मुख्योद्दिष्टे वर्तेते छात्राणां वाग्वृद्धिः धैर्योपचयश्च। तदर्थं प्रतिसप्ताहं शुक्रवासरे



कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य शास्त्रविद्यागुरुकुलपक्षतः धिषणापरिषदियमायोज्यते। तत्र च छात्राः स्वशास्त्रात् उत अन्यशास्त्रेभ्यः विषयान् चित्वा तान् उपस्थापयन्ति। अस्मिन् प्रथमाधिवेशने आध्यक्ष्यं समलङ्कृतवन्तः सर्वेषां, धिषणापरिषदायोजने च प्रेरणास्थानाः विश्वविद्यालयस्य मान्याः कुलपतयः आचार्यहरेरामत्रिपाठिवर्याः। तैः सह अतिथिरूपेण उपस्थिताः आसन् अस्य विश्वविद्यालयस्य आदरणीयाः कुलसचिवाः प्रो. कृष्णकुमारपाण्डेमहाभागाः, आदरणीयाः परिसरसञ्चालकाः हरेकृष्ण अगस्तिवर्याः, साहित्यविभागसङ्कायाध्यक्षा आदरणीया प्रो. कविताहोलेमहोदया, आधुनिकभाषाविभागप्रमुखाः आदरणीयाः परागजोशीमहाभागाश्च। अस्मिन् पर्याये धिषणापरिषदः समन्वयकत्वं निर्वहन्तः सन्ति शाषस्त्रविद्यागुरुकुलस्य प्राध्यापकाः निशान्तमिश्रवर्याः, एवञ्च सहसमन्वयकत्वेन उपस्थिताः आसन् डॉ. सचिनद्विवेदी आचार्याः। उद्घाटनसत्रस्यामुष्य सूत्रसञ्चालनं कृतवती आचार्यप्रथमवर्षस्य दर्शनविभागे अधीयाना छात्रा कृतिका जैन।

कार्यक्रमारम्भे मान्यवराणां स्वागतपुरस्सरं छात्रैः स्वस्वविषये प्रस्तुतिः कृता। तत्र चतुर्भिः छात्रैः भाषणानि प्रस्तुतानि। तेषां च नामानि इत्थम् -

१. वैखरी काळे (शास्त्रीप्रथमवर्षम्, व्याकरणविभागः)-२. गौरी पाठक (शास्त्रीतृतीयवर्षम्, भारतीयदर्शनविभागः) - कारिकावल्याः मङ्गलाचरणनिरूपणम्। ३. हिमांशु शर्मा (प्राक्शास्त्रीद्वितीयवर्षम्) - ४. शिखर द्विवेदी (प्राक्शास्त्रीद्वितीयवर्षम्) -

भाषणानां पश्चात् अतिथिरूपेण उपस्थितौ परिसरसञ्चालकाः अगस्तिवर्याः कुलसचिवमहोदयाः कृष्णकुमारपाण्डेमहोदयाश्च छात्रान् औद्बोधयताम्। तत्पश्चात् आरूढाध्यक्षपदैः सम्मान्यैः कुलपतिभिः प्रो. हरेरामत्रिपाठीवर्यैः छात्राणाम् उद्बोधनम् अकारि।

कुलपतिः प्रो हरेराम त्रिपाठी उक्तवान्, छात्राणां संस्कृतवाक्पटुतां शास्त्राभ्यासं च सुदृढं कर्तुं धिषणापरिषदः उपक्रमः प्रशंसनीयः अस्ति।

तदनन्तरं कार्तज्ञज्ञापनम् अकार्षुः धिषणापरिषदः सहसमन्वयकाः डॉ. सचिनद्विवेदी आचार्याः। कार्यक्रमसमाप्तिश्च शान्तिमन्त्रेण अभूत्।

---

# संस्कृतसप्ताहमहोत्सवस्य भव्यमायोजनम्

डॉ.विजयगुप्ताः

नवदेहली। विश्वस्मिन् विश्वे श्रावणमासस्य पूर्णिमा तिथौ संस्कृतदिवसं समाचरते। तत्र संस्कृतानुरागिभ्यः सप्तदिनं यावत् संस्कृतमधित्य नैकाः प्रतियोगिताः समायोज्यन्ते। एतस्मिन् एव



क्रमे नवदेहलीस्थ-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन अगस्तमासस्य 16 तः 21 दिनाङ्कं यावत् संस्कृतसप्ताहमहोत्सवः समाचरितः। प्रथमे दिवसे उद्घाटनसत्रे विश्वविद्यालयस्य कुलपतीनां प्रो. मुरलीमनोहरपाठकवर्याणामाध्यक्ष्ये जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानस्य आचार्याणां प्रो.रामनाथझामहाभागानां संस्कृतं विज्ञानञ्चेति विषयमधिकृत्य विशिष्टं व्याख्यानं जातं तथा च संस्कृतसप्ताहमहोत्सवे प्रायोजितानां स्पर्धानामुद्घाटनमपि कृतम्। आध्यक्ष्यवक्तव्ये प्रो. मुरलीमनोहरपाठकवर्यैः संस्कृतभाषायाः प्राचीनत्वविषये तस्याः प्रासङ्गिकताविषये च गभीरव्याख्यानं कृतम्। सप्तदिवसीय महोत्सवे अस्मिन् भिन्नभिन्नविषयमधिकृत्य षड्विशिष्टं व्याख्यानं सम्पादितम्। अस्मिन् महोत्सवे गीतगायन-पोस्टरनिर्माण-स्लोगनलेखन-भाषण-स्तोत्रपाठ-गीताकण्ठपाठ-एकलनृत्य-श्लोकोच्चारण-प्रश्नमञ्चेत्यादिप्रतियोगिनां समायोजनं कृतम्। प्रतियोगितासु प्रायशः विंशतिसंस्थाभ्यः पञ्चाशदधिकैकशतं प्रतिभागिनः भागं गृहीतवन्तः। एतस्य महोत्सवस्य समापनम् अगस्तमासस्य एकविंशतिदिनाङ्के अपराह्णे समायोजितः। अस्मिन् समापनसत्रे मुख्यातिथिरूपेण संस्कृतभारत्याः अखिलभारतीयसंघटनमन्त्रिणः मा. दिनेशकामतमहाभागाः समुपस्थिताः आसन्। अस्मिन् समापनसत्रे एव प्रतियोगितायाः विजेतॄन् प्रमाणपत्रं, पुरस्कारं स्मृतिचिह्नञ्च प्रदाय उत्साहवर्धनं कृतम्। अस्मिन् सत्रे मुख्यातिथिभिः संस्कृतस्य माहात्म्यं तद्व्यवहारे आचरितव्यमिति दार्ढ्येनोक्तम्। अनेन प्रकारेण श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन संस्कृतसप्ताहमहोत्सवस्य अत्यन्तं हर्षोल्लासपूर्वकेण समायोजनं जातम्। अस्य महोत्सवस्य समन्वयकाः छात्रकल्याणपीठाध्यक्षाः प्रो.शिवशङ्करमिश्रमहाभागाः आसन। संयोजकाः डॉ. दिनेशयादवमहाभागाः आसन्। सह-संयोजकाः डॉ. परमेशकुमारशर्मा इति। अस्मिन् महोत्सवे डॉ.विजयगुप्ता, डॉ.मिनाक्षीमिश्रा, डॉ.ई.वेङ्कटेश्वर्लु, डॉ.अनमोलशर्मा, डॉ. रमेशकुमारः, डॉ.आदित्यपञ्चोली, डॉ.देशबन्धुश्चेति विश्वविद्यालयीयाचार्याणां सहयोगेन अयं कार्यक्रमः सुसम्पादितः।

---

# लखनऊस्थकेन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः एवं लखनऊस्थविविध-विद्यालयानां संयुक्ततत्त्वावधानेन संस्कृतदिवससमारोहः अनुष्ठितः

-प्रवेशकुमारशुक्ल,

लखनऊ। अयि सुरभारतीसमुपासकाः १६.८.२०२४ तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः, लखनऊ एवं लखनऊस्थविविधविद्यालयानां संयुक्ततत्त्वावधानेन लखनऊ-नगरस्थविभिन्नेषु विद्यालयेषु संस्कृत-दिवस-समारोहः समायोजितः। इमे समारोहाः विश्वविद्यालयस्य यशस्वीकुलपतिनाम् आचार्यश्रीनिवासबरखेड़ीमहोदयानां संरक्षणे तथा च लखनऊपरिसरस्य निदेशकमहोदयानाम् आचार्यसर्वनारायणझामहोदयानां प्रधानसंयोजनेन सम्पन्नाः।



CSU लखनऊपरिसरः एवं पीएम श्री केन्द्रीयविद्यालयः, गोमतीनगरम्, लखनऊ इत्यनयोः संयुक्ततत्त्वावधानेन लखनऊगोमतीनगरस्थ पीएम श्री केन्द्रीयविद्यालये प्रातः 7:00 वादने उप-प्राचार्यायाः श्रीमतीसंगीतासक्सेनामहोदयायाः अध्यक्षतायां संस्कृत-दिवस-समारोहोऽयं सम्पन्नः जातः। अस्मिन्नवसरे मुख्यवक्त्रीरूपेण विद्यालयस्य संस्कृतप्राध्यापिका श्रीमतीशैलमसक्सेना महोदया उपस्थिता आसीत्। संस्कृताध्यापकः श्रीविजयबहादुरमहोदयः अपि उपस्थितः आसीत्। अस्मिन्कार्यक्रमे विद्यार्थिनां कृते सुभाषितश्लोकगानस्पर्धा आयोजिता। तस्यां प्रतियोगितायां प्रथमः किशोरी, द्वितीयः प्रखरः, तृतीयः अरण्या, सान्त्वना सृष्टिः च पुरस्कारान् प्राप्तवन्तः। प्रो. लोकमान्यमिश्रमहोदयानां संयोजनेन, डा. रुद्रनारायणनरसिंहमिश्रमहोदयानां सह-संयोजनेन एवञ्च शिक्षाशास्त्रविभागीयतृतीयसत्रार्द्धछात्राध्यापकैः छात्राध्यापिकाभिश्च कार्यक्रमः सम्पादितः।

केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः एवं द इंडियनपब्लिकइंटरकॉलेज, विनयखण्डः, गोमतीनगरम्, लखनऊ इत्यनयोः संयुक्ततत्त्वावधानेन मध्याह्ने 12:30 वादने विद्यालयस्य प्रबन्धिकानां श्रीमतीविमलायादवमहोदयानाम् अध्यक्षतायां संस्कृत-दिवस-समारोहोऽयं सम्पन्नः जातः। अस्मिन्नवसरे मुख्यवक्त्रीरूपेण विद्यालयस्य प्रधानाध्यापिका श्रीमतीउषाउपेतिमहोदया उपस्थिता आसीत्। अस्मिन्कार्यक्रमे विद्यार्थिनां कृते संस्कृतश्लोकगानस्पर्धा आयोजिता। तस्यां प्रतियोगितायां प्रथमस्थानं साक्षी तिवारी, द्वितीयस्थानं मोहसीन खान एवं व्याख्या सिंह, तृतीयस्थानं संगमः एवं रोशनी च प्राप्त्वा पुरस्कारान् प्राप्तवन्तः। अस्य कार्यक्रमस्य संयोजकः प्रो. देवीप्रसाद द्विवेदी महोदयः आसीत। शिक्षाशास्त्रविभागीयतृतीयसत्रार्द्धछात्राध्यापकैः छात्राध्यापिकाभिश्च कार्यक्रमोऽयं सम्पादितः।

केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः एवं प्रकाशबालविद्यामन्दिरइण्टर कॉंलेज, विशालखण्डः-१, गोमतीनगरम्, लखनऊ इत्यनयोः संयुक्ततत्त्वावधानेन मध्याह्ने 1:00 वादने विद्यालयस्य प्रबन्धकानां श्रीरामदयालमौर्यमहोदयानाम् अध्यक्षतायां संस्कृत-दिवस-कार्यक्रमोऽयं सम्पन्नः जातः। अस्मिन्नवसरे विद्यालयस्य प्रधानाध्यापिका श्रीमतीतृप्तिसिंहमहोदया मुख्यवक्त्रीरूपेण उपस्थिता आसीत्। अस्मिन्कार्यक्रमे विद्यार्थिनां कृते संस्कृतश्लोकगानस्पर्धा आयोजिता। अस्मिन् कार्यक्रमे संस्कृतश्लोकगानम्-भाषणम्-संस्कृतगीताप्रतियोगिताः आयोजिताः, यासु प्रथमस्थानं गौरवः, द्वितीयस्थानं आर्यकुमारः, तृतीयस्थानं आयुषकुमारः, सान्त्रनास्थानं कृष्णश्च प्राप्त्वा पुरस्कारान् प्राप्तवन्तः। अस्य कार्यक्रमस्य संयोजकः प्रो.गणेशशंकरविद्यार्थीमहोदयः आसीत्। शिक्षाशास्त्रविभागीयतृतीयसत्रार्द्धछात्राध्यापकैः छात्राध्यापिकाभिश्च कार्यक्रमोऽयं सम्पादितः।

CSU, लखनऊपरिसरः एवं गंगोत्रीशिशुमन्दिरपब्लिक स्कूल, ग्वारीग्रामः, गोमतीनगरम्, लखनऊ इत्यनयोः संयुक्ततत्त्वावधानेन मध्याह्ने 12:00 वादने विद्यालयस्य प्रबन्धिकानां श्रीमतीमंजुघिल्डियालमहोदयानाम् अध्यक्षतायां संस्कृत-दिवस-कार्यक्रमोऽयं सम्पन्नः जातः। अस्मिन्नवसरे विद्यालयस्य प्रधानाध्यापिका मोनिकाघिलडियालमहोदया मुख्यवक्त्रीरूपेण उपस्थिता आसीत्। अस्मिन् कार्यक्रमे संस्कृतश्लोक-मन्त्र-गान-प्रतियोगिताः आयोजिताः, यासु प्रथमस्थानं शिवालिका एवं आशुतोषः, द्वितीयस्थानं अक्षरा एवं प्रेमा सिंह, तृतीयस्थानं राखी एवं रूही, सान्त्वनास्थानं अमन् एवं ईरम खान्श्च प्राप्त्वा पुरस्कारान् प्राप्तवन्तः। अस्य कार्यक्रमस्य संयोजिका प्रो.अवनीशअग्रवालमहोदया आसीत्। शिक्षाशास्त्रविभागीयतृतीयसत्रार्द्धछात्राध्यापकैः छात्राध्यापिकाभिश्च कार्यक्रमोऽयं सम्पादितः।

## संस्कृतचलच्चित्रम्-मा कश्चित् दुःखभाग्भवेत्

वार्ताहरः वत्स देशराज शर्मा

डॉ.मानसरञ्जनसाहु-महोदयेन निर्देशितं चतुर्थसंस्कृतचलच्चित्रं 'मा कश्चित् दुःखभाग्भवेत्' इत्यस्य लोकार्पणं जातम् अस्ति। अस्मिन्




चलच्चित्रे शारदासागरमहान्ति, अजितरणा, तपनप्रधानः, श्रवणदेवता,अनन्तहाथि,निहाररञ्जनवागः च अभिनयं कृतवन्तः। एकस्य कुम्भकारस्य जीवनचरित्रम् अत्र अभिनितम् अस्ति पुनश्च आधुनिकतायाः प्रभावकारणेन प्राकृतिकद्रव्यणाम् परिहारविषये चित्रितम् अस्ति। अस्य चलच्चित्रस्य माध्यमेन समाजे एकम् उत्तमं परिवर्तनम् आगमिष्यति इति निर्देशकः डॉ.मानसः वदति। चलच्चित्रं दृष्ट्वा जनाः एतादृशस्य विचारस्य प्रशंसां कुर्वन्तः सन्ति।

## संस्कृतम् अस्माकं जीवनस्य मूल्यं बोधयति- डॉ०रत्नेशत्रिवेदिवर्यः

प्रेषकः आचार्यदीनदयालशुक्लः

भारतीयज्योतिषसंस्थानन्यास, वाराणसीद्वारा आयोजितः साप्ताहिकः संस्कृतसप्ताहकार्यक्रमः आन्लाईनद्वारा आयोजितः। अस्य कार्यक्रमस्य प्रथमदिने उद्घाटनसत्रं सम्पन्नम् यस्मिन् डॉ. रत्नेश त्रिवेदी जी मुख्यातिथिरूपेण उपस्थिताः आसन्। कार्यक्रम के द्वितीयदिनस्य मुख्यातिथि रूपेण आचार्ययोगेशः उपस्थितोऽभवत्द्य तृतीयदिवसस्य कार्यक्रमे दिल्लीनगरे स्थितस्य लालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विद्यापीठविश्वविद्यालयस्य दर्शनविभागस्य अध्यक्षः डॉ. रामचन्दशर्मा मुख्यातिथिरूपेण उपस्थितः आसीत्। चतुर्थे दिने कार्यक्रमस्य मुख्यातिथिः काश्याः सुप्रतिष्ठिता ज्योतिषमर्मज्ञा श्रीमती पार्वतीपाण्डेया सामागच्छत्। पञ्चमदिवसस्य अतिथिः काशीहिन्दूविश्वविद्यालयस्य दर्शनविभागस्य डॉ.वागीश ओझा आसीत् । कार्यक्रमे अग्रिमातिथि अमितझा, ओमदत्तद्विवेदी च भविष्यन्ति। कार्यक्रमे भारतीय ज्योतिषसंस्थानस्य अध्यक्षः आचार्यअम्बिकेशदुबे एवं निदेशक आचार्य धीरजदुबे अनयोः महत्वपूर्णा भूमिका वर्तते। अयं संस्कृतसप्ताहोत्सवः आचार्यदीनदयालशुक्लेन संयोजकत्वेन सर्वैस्सह मिलित्वा आयोजितः। सम्पूर्णे कार्यक्रमे प्रतिदिनं विभिन्नाः स्पर्धाः आयोजिताः आसन्। श्लोकवचनगीतापाठः, संस्कृतकथाकथनम्, पोस्टरमेकिंग् इत्यादीनि प्रतियोगितानि आयोजितानि आसन। यस्मिन् बहवः छात्राः भागं गृहीतवन्तः। प्रतिवर्षं भारतीयज्योतिषसंस्थाभिः संस्कृतसप्ताहस्य आयोजनं भविष्यति। अस्मिन् कार्यक्रमे आचार्य मुकुलकौशिकः, श्रीमती संगीतासुयालः, सुनीतासहारन, पवनमिश्रः, मनोजकुमारः, नितेशपाण्डेयः पुस्तकसिंह सहितम् अनेके अधिकारिणः उत्साहपूर्वकं भागमवोढन्। आचार्यदीनदयालशुक्लः अवदत् यत् प्रतिवर्षम् अस्य संकेतसप्ताहस्य आयोजनं भविष्यति। सर्वेषां प्रतिभागिनां पुरस्कार-प्रशंस-सत्रस्य आयोजनं २२ अगस्त-दिनाङ्के ऑनलाइन-रूपेण भविष्यति।इतिसम्।

## संस्कृतसप्ताहस्य सम्पूर्तिसत्रं समायोजितम्

वार्तालेखकः-आचार्यदीनदयालशुक्लः

वसुदेवसुतं देवं कंसचाणूरमर्दनम् देवकीपरमानन्दं कृष्णं वंदे जगद्गुरुम्।भारतीयज्योतिषसंस्थानेन १६ दिनाङ्कारभ्य द्वाविंशतिः अगस्तपर्यन्तं 'संस्कृतसप्ताहस्य' आयोजनं महता उत्साहेन कृतम्। अस्य कार्यक्रमस्य सप्तमेदिने समापनसत्रकार्यक्रमे मुख्यातिथिः ओमदत्तद्विवेदिवर्यः समागत्य संस्कृतं विषये सर्वान् बोधितवान्। कार्यक्रमे भारतीय ज्योतिषसंस्थानस्य अध्यक्षः आचार्यअम्बिकेशदुबे एवं निदेशक आचार्य धीरजदुबे अनयोः महत्वपूर्णा भूमिका वर्तते। अयं संस्कृतसप्ताहोत्सवः आचार्यदीनदयालशुक्लेन संयोजकत्वेन सर्वैस्सह मिलित्वा आयोजितः। सम्पूर्णे कार्यक्रमे प्रतिदिनं विभिन्नाः स्पर्धाः आयोजिताः आसन। श्लोकवचनगीतापाठः, संस्कृतकथाकथनम्, पोस्टरमेकिंग् इत्यादीनि प्रतियोगितानि आयोजितानि आसन। यस्मिन् बहवः छात्राः भागं गृहीतवन्तः। प्रतिवर्षं भारतीयज्योतिषसंस्थाभिः संस्कृतसप्ताहस्य आयोजनं भविष्यति। अस्मिन् कार्यक्रमे आचार्य मुकुलकौशिकः, श्रीमती संगीतासुयालः, सुनीतासहारन, पवनमिश्रः, मनोजकुमारः, नितेशपाण्डेयः पुस्तकसिंह सहितम् अनेके अधिकारिणः समुपस्थितारभवन्। संस्कृतशिक्षाविभागस्य प्रचाविभागस्य तथा प्रतिभाप्रदर्शनस्य एवं ज्योतिषप्रशिक्षकाणां समर्पितप्रयत्नेन बालकैः प्रस्तुतानां श्लोकानां, प्रश्नोत्तरीकार्यक्रमानाम्, भाषणानां इत्यादीनां पाठेन कार्यक्रमे वर्णः नितरां वर्धितः। कार्यक्रमस्य अन्ते संस्थानस्य आचार्यः श्रीधीरजदूबेवर्यः समेषां छात्राणां सम्बोधनं कृत्वा भारतीयसंस्कृतेः धरोहरविशेषतानां संरक्षणं विषये सम्बोधितवान्। संस्थानस्य शिक्षाप्रमुखेण आचार्यदीनदयालशुक्लेन समग्रप्रतिस्पर्धाविवरणं श्रावितं संस्थानसदस्यानां परिचयः कारयन् प्रोक्तं यत् प्रतिवर्षं संस्कृतसप्ताहकार्यक्रमः संस्थानद्वारा आयोजयिष्यते। सर्वेभ्यः संस्कृतसप्ताहस्य अनन्तशुभकामनाः!!

# संस्कृतभारती द्वारा संस्कृतसप्ताहस्य शुभारंभः

संस्कृतभारती देहरादूनेन पंचायती मन्दिर घोसी गली देहरादूने संस्कृत सप्ताहस्य शुभारंभः यज्ञेन कृतम्। गीताशिक्षणप्रमुखेन योगेशकुकरेतिना यज्ञकर्मणोऽस्य आचार्यत्वं निर्व्यूढम्। जनपदमन्त्रिणा चर्चितं यत् सम्भाषण शिबिर शिक्षण पद्धत्या लक्षशः जना संस्कृतेन वक्तुं सक्षमाः अभवत्। कार्यक्रमे शिक्षण प्रमुखः डा. राजेश शर्मा, महिला प्रमुखा डा. अनुमेहा वैद्या, छात्र प्रमुखा शिवानी रमोला, दून विश्वविद्यालय छात्र संयोजिका स्वेता रावतः, लीजा, हर्रावाला छात्र संयोजिका लक्ष्मी यादवः, मियांवाला वसतिसंयोजिका ऋतु जदली, पूर्व विस्तारकः नितीश मैठाणी, डा बीना पुरोहितः इत्येतैः सहिताः अनेके गणमान्य जनाः उपस्थिताः।




# दयानन्दपब्लिकस्कूलपाण्डुसरे नगर संगोष्ठी सम्पन्ना जाता

-अजयकुमारआर्यः

नाभानगरे। नाभा नगरे जनपदाध्यक्षः श्री निगमस्वरूपमहोदयस्याध्यक्षतायां दयानन्दपब्लिकस्कूलपाण्डुसरे नगर संगोष्ठी सम्पन्ना जाता। यस्मिन् पञ्जाब प्रान्तस्य प्रान्त- मन्त्री श्रीमन्



संजीवश्रीवास्तवमहोदयेन संस्कृतभारत्याः परिचयः दत्तः तथा तस्य प्रकल्पानां विषये प्रबोधनं कारितम् । डॉ. उदयनः प्रान्त -संपर्क -प्रमुख महोदयेन 'संस्कृतं किमर्थम् आवश्यकम्' अस्मिन् विषये बोधितम् । प्रान्तसहमन्त्री अजय -आर्यः महोदयेन वर्तमाने नाभा नगरे संस्कृतभारत्याः प्रचल्यानाम् कार्याणां विस्तारपूर्वक वर्णनं कृतम्। वर्तमाने त्रिषु विद्यालयेषु शिबिराणि प्रचल्यमानानि सन्ति । एकं शिबिरं प्रातःदयानन्द-पब्लिक-विद्यालय-पांडुसरे ७:३० तः ८:३० वादन पर्यन्तं चलति । द्वितीयं शिबिरं भाई -कान्ह-सिंह राजकीय-सिनियर-स्कैन्ड्री-स्मार्ट-कन्या- विद्यालय नाभायां ९: ०० तः ११:०० वादन पर्यन्तं चलति। तृतीयं शिबिरं राजकीय-मॉडल-हाई-विद्यालय -नाभायां १२: ४० तः ०१: ३० पर्यन्तं चलति। यस्मिन् महोदयेन नाभा नगराय आगतः नूतनस्य विस्तारकस्य श्रीमन् मनीष महोदयस्य परिचयः तत्रत्यैः सामाजिक-जनैः सह कारितः। एवमागामी बुधवासरात् सायंकालात् पञ्चवादनात् षड्वादन-पर्यन्तम् एकस्य सामजिक शिबिरस्य घोषणा जाता। एतत् शिबिरं दयानन्द पब्लिक विद्यालय पांडुसरे भविष्यति। एतानि सर्वाणि शिबिराणि नाभा नगर विस्तारकः मनीष महोदयेन द्वारा संचालमानानि सन्ति। अस्यां गोष्ठ्याम् २५ संस्कृतनुरागिनाः आगताः। जलपानस्य व्यवस्था दयानन्द पब्लिक विद्यालयस्य प्रचायेण कृतम् । गोष्ठ्यां गिरधारी लाल महोदयः, नगरसहसंयोजकः मोहितमहोदयः, अनिल महोदयः नगरव्यवस्थाप्रमुखः, दयानन्द विद्यालयस्य प्रधानाचार्यः श्रीमन्सुभाषमहोदयः, श्रीमन्सोमनाथशर्मामहोदयः , चन्द्रशेखरमहोदयः, दीपकमहोदयः, अर्शदीपमहोदया, आयुर्वेदाचार्यगगनदीप महोदयः आदयः संस्कृतप्रेमीजनाः भागं गृहीतवन्तः।

# डॉ रामभूषणबिजल्वाणः संस्कृतभारतीदेहरादूनजिल्लायाः अध्यक्षः जातः

वार्ताहरः -धीरजमैठाणी

धर्मपुरम्। समग्रदेहरादूनजनपदे संस्कृतं प्रसारयितुं प्रसारयितुं समाचरितस्य संस्कृतसप्ताहस्य सम्पूर्तिसत्रं जनकल्याणन्यासे धर्मपुरे, देहरादूने सम्पन्नम्।



तत्र अध्यक्षीये उद्बोधने डा रामभूषणबिजल्वाणः संस्कृतस्य व्यावहारिकं महत्वं बोधयन् संस्कृतमेव भविष्यमित्यवदत्। मुख्यवक्ता शिवनाथ-संस्कृत-विद्यालयस्य पूर्वप्राचार्यः डा सूर्यमोहनभट्टः संस्कृतभाषायाः वैज्ञानिकतां, सामाजिकसामरस्यं साङ्घटनिकं महत्वं च प्रकाशितवान्।

विभागसंयोजकः नागेन्द्रव्यासः धन्यवादं ज्ञापयन् संस्कृतमहाविद्यालयस्य प्राचार्यपदम् अलङ्कुर्वतः, गोक्रान्तिमञ्चस्य राष्ट्रियप्रवक्तुः, विविधशास्त्रनिष्णातस्य विदुषः डॉ रामभूषणबिजल्वाणस्य देहरादूनजिल्लायाः अध्यक्षीयदायित्वहेतवे उद्घोषणाम् अकरोत्। बिजल्वाणवर्येण सहर्षं दायित्वनिमित्तं स्वीकारोक्तिः प्रदाय समस्तकार्यकर्तृभिः सह मेलितुम् आगामिसितम्बरमासे आयोजयिष्यमाणायाः त्रिदिवसीयायाः अखिलभारतीयस्तरीयगोष्ठ्याः प्राप्तदायित्वानुरूपं रणनीतिः विनिर्मातुं प्रौक्ता। भूतपूर्वः अध्यक्षः डॉ सूर्यमोहनभट्टः प्राचार्यः (पूर्वप्राचार्यः, शिवनाथसंस्कृतविद्यालयः) तदीयदायित्वस्य समर्थनं कुर्वन् शुभाशंसनं विधाय प्रसन्नतां व्यक्तीकृतवान् । मञ्चस्थेषु अतिथिषु सामाजिकः उद्यमी वृजचौधरी, राम- राम एसोसिएटप्रतिष्ठानस्य अधिष्ठाता देवेन्द्रसिंहश्च कार्यक्रमस्य शोभाम् अवर्धताम्। दीपप्रज्ज्वलनेन कार्यक्रमः आरब्धः। कुङ्कुम सरस्वतीवन्दनां जनपदमन्त्री डा प्रदीपसेमवालः अतिथीनां परिचयं, स्वागतं, प्रास्ताविके संस्कृतसप्ताहस्य इतिवृत्तकथनं च अकरोत्। सहविभागसंयोजकः डा नवीनजसोला स्वेन वैदुष्यपूर्णवक्तव्येन सर्वान् अभिमुखीकृतवान् । ध्येयमन्त्रं श्वेतारावतः, स्वागतेन नृत्यं सरिता, तनीशा सेजल च अकुर्वन्, साभिनयम् इष्टवन्दनम् आद्यापौडेलः अकुर्वन्, उत्तराखण्ड- आयुर्वेद-विश्वविद्यालयस्य मुख्यपरिसरस्य हर्रावालायाः प्रींसा, अदितिः, कोमल, इंशा, सागरः इत्यादिभिः बीएमएस प्रथमवर्षीयच्छात्रैः कुशलपूर्वकं संस्कृतनाटकं (प्रहसनं) प्रस्तुतम्। मञ्चसञ्चालनं महानगरमन्त्री माधवपौडेलः अकरोत। अन्ते यथार्थजसोला रुद्राष्टकम् अश्रावयत् । अमुस्मिन्नवसरे विशेषतया डोईवाला खण्डसंयोजकः डॉ आनन्दजोशी, रायपुरखण्डसंयोजकः धीरजविष्टः, गीताशिक्षणप्रमुखः योगेशकुकरेती, सम्पर्कप्रमुखः धीरजमैठाणी इत्येतान् समेत्य कार्यकर्तृषु छात्रप्रमुखा शिवानीरमोला सौरवखण्डूरी, लीजा, लक्ष्मीयादवः, पीयूषशर्मा, दुर्गाप्रसादविष्टः, डॉ बीनापुरोहितः, अभिषेकखण्डूरी इत्यादयोऽनेके सामाजिकाः संस्कृतानुरागिणः समुपस्थिताः आसन्।

**पाठकानां कृते सूचना**

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

## अगस्तमासस्य आभाषिककक्षाभिस्सममेव ऑनलाइनप्रशिक्षण पाठ्यक्रम-निर्माण-योजनायाश्चतुर्थं चक्रं सम्पन्नम्

लखनऊ ( दिनाङ्कः २८/०८/२०२४ )। संस्कृतशिक्षया अनेके लाभाः, येषु केचन प्रमुखतया परिगणिताः यथा- बौद्धिक क्षमतायाः विकासः संस्कृत भाषया स्मरण शक्तिः, एकाग्रता, तार्किकचेतना क्षमता इत्यासु वृद्धिर्जायते ।मानसिक शांतिः संस्कृत भाषया मनश्शांतं एकाग्रं च भवति।

आत्मविश्वासः, सृजनात्मकता, धैर्य, अन्यासां भाषाणां ज्ञानं, भारतीय संस्कृतेः मूल्यानां च अवगमनं, आजीविकायाः अवसरः संस्कृत शिक्षा क्षेत्रे शिक्षणम्, अनुसंधानं, अनुवादः इत्येते अनेके अवसराः समुपलब्धाः सन्ति।

आत्मिक विकासः-आत्म-ज्ञान आत्मिक विकास मार्गोऽपि एतन्माध्यमेनैव सिद्ध्यतीत्युपर्युक्त लाभान् समाधृत्य निरंतरं चतुः-पञ्च वर्षेभ्यो गूगल मीट द्वारा विभिन्न समयानां विकल्पैस्सहितानां संचालितविंशतिदिवसीय संस्कृत भाषा शिक्षण कक्षाणां संचालनम् उत्तर प्रदेश संस्कृत संस्थानम् , लखनऊ (भाषा विभागः , उत्तर प्रदेश शासन की स्वायत्त शासी संस्था) करोति । अगस्त मासीय कक्षाणां समारोहे निदेशकः विनय श्रीवास्तवः कथितवान् यत् कक्षामाध्यमेन न केवलम् उत्तर प्रदेशस्य अपितु देशस्य प्रायः समस्त राज्यानां शिक्षार्थिनो लाभः प्राप्तः। आकर्षक पाठ्यक्रमः अनुभविनः प्रशिक्षकाः दृढ़ प्रबंधनं च आसाम् ऑनलाइन कक्षाणां सफलताकारणम।

अगस्त मासीय कक्षाभ्यः 1983 संख्यकेषु पंजीकृत शिक्षार्थिषु विभिन्न समयेषु प्रबंधितासु 39 कक्षासु सहस्रैकं समुपस्थाय संस्कृत वाग्व्यवहारस्य शिक्षा गृहीतवन्तः। आगामिनि चक्रे संख्या इयं वर्धिष्यत इति अनुमीयते।

योजना प्रमुखः भगवान् सिंह चौहानोऽकथयत् यत् संस्कृत सप्ताहस्य अंतर्गतानां सप्त प्रेरणा सत्राणाम् आयोजनं जातम्। येषु डॉ मुरली कृष्णः अगस्त्यगुरुकुलं चेन्नई, विष्णु वी नम्पूतिरिः जैनगुरुकुलं चेन्नई, पूनम मालवीया एलिटविद्यालयः वाराणसी, डा अरविंद नारायण मिश्रः उत्तराखंडविश्वविद्यालयः हरिद्वारम्, शिवरामकृष्णः प्रांत प्रचार प्रमुखः संस्कृत भारती आंध्र प्रदेशः, डॉ शशिकांत तिवारी शशिधरः वैद्यनाथ पांडे संस्कृत महाविद्यालयः, सिवानः, एक नारायण पौडेलः अध्यक्षः वैदिक गण दिल्ली इत्येते विद्वांसः विविध विषयान् अवलंव्य संस्कृतस्य महत्वं प्रकाश्य शिक्षार्थिनां मार्गदर्शनं कृतवन्तः।

प्रथमपुटस्य शेषभागः

## संकल्पनादिवससमारोहः

एतदनु विशिष्टातिथिना सेन्टस्टीफन्समहाविद्यालये संस्कृतविभागे सहायकाचार्येण डॉ. अभयसिंहेन नैकेषु विषयेषु सरस्वती श्रीराम-कृशरा-प्रभृतिषु काव्यपाठः कृतः। तेन समस्यापूर्त्तयोऽपि श्राविताः। ऋषिराजपाठकेन सदाऽवतु माम् इति काव्यं श्रावितम्। कविसमवायाध्यक्षेण डॉ. युवराजभट्टराईवर्येण आचार्यरमाकान्तशुक्लवर्याणां




पुण्यस्मरणपूर्वकं बदरीशसप्तकम् इति काव्यं वसन्ततिलघ्कच्छन्दसि श्रावितम्।

'अयोध्याधिपः साम्प्रतं राम मुक्तः' इति काव्यं चापि तेन श्रावितम्। एतदनु संस्कृतसंवादपत्रसम्पादकेन श्रीमता वेदशर्मणा आचार्यरमाकान्तशुक्ल-पुण्यस्मरणपूर्वकं तेषां संवादाः सूक्तिभूताः उक्ताः। तेनोक्तं जीवने सर्वोत्तमताप्राप्त्यै सज्जनता प्रथमानिवार्यता। राष्ट्रकिङ्करपत्रसम्पादकेन श्रीमता विनोदबब्बरेण आचार्याणां रमाकान्तशुक्लवर्याणां संवादाः स्मारिताः। परिषत्संरक्षिकया श्रीमत्या रमादेवीशुक्लया आशीर्वादपूर्वकं कृतज्ञता प्रकाशिता। तदनु अक्षरश्लोकं सर्वैः कृतम्।

पुनश्च 'भाति मे भारतम्' इति गीतगानानन्तरं धन्यवादज्ञापनानन्तरं च शान्तिपाठपूर्वकं कार्यक्रमः समाप्तिमुपागात् ।

प्रथमपुटस्य शेषभागः

## केन्द्रीयसंस्कृतविश्वविद्यालयस्य....

अपि सदा सर्वदा सर्वेषु स्तरेषु च यत्नः कर्त्तव्यः। एवमस्मिन् सप्ताहव्यापिनि कार्यक्रमे आयोजितासु स्पर्धासु विजेतॄणां छात्राणां कृते पुरस्कारवितरणमपि अभवत्। किञ्च समागतेषु अतिथिषु विद्वत्सपर्याक्रमे




याजपुरविरजामण्डलपण्डितमहासभायाः सभापतिभ्यः पण्डितभूपतिभूषणमिश्रवर्येभ्यः तथा श्रीसदाशिवपरिसरस्य साहित्यविभागस्य प्राक्तन-अध्यापिकाभ्यः सुश्रीस्नेहनन्दमहोदयाभ्यः च परिसरपक्षतः निदेशकमहोदयाः सम्बर्धनं कृतवन्तः। सम्पूर्ति-सभायाम् अतिथीनां कृते स्वागतभाषणं परिसरस्य आचार्यैः प्रो.ललितकुमारसाहुमहोदयैः प्रस्तुतम्। कार्यक्रमस्यास्य संयोजिकाः आसन् दर्शनविभागमुख्याः प्रो. गौरप्रियादशमहोदयाः तथा सञ्चालकाः च डॉ. नन्दिघोषमहापात्रमहोदयाः। प्रो.निर्मलापाणिग्राही तथा डॉ ज्योतिप्रकाशनन्दश्च पुरस्कृत-विदुषोः मानपत्रे प्रस्तुतवन्तौ। कार्यक्रमस्यान्तिमे पर्याये परिसरस्य छात्राश्च सांस्कृतिककार्यक्रमान्तर्गतं गीत-संगीत-नाटकानि प्रादर्शयन्। एवं संस्कृतसप्ताहस्य समेऽपि कार्यक्रमाः सफलतया सम्पन्नाः अभवन् इत्येतदर्थं परिसरनिदेशकाः आचार्यबनमालीबिश्वालमहोदयाः सर्वेभ्यः आचार्येभ्यः छात्रेभ्यश्च धन्यतावचांसि समर्पयन्।

प्रथमपुटस्य शेषभागः

## देशस्य त्रिभिः केन्द्रीयसंस्कृत.....

संबर्धने विकसितभारतस्य उन्नयने विशेषतया संस्कृतच्छात्राणां अत्यंतं महत्त्वपूर्णा भूमिका भविष्यति। एतैः त्रिभिः केन्द्रीयविश्वविद्यालयैः आयोजिते उत्कर्षदिवसे चर्चा माध्यमेन सुनिश्चितं भवतु यत् संस्कृतस्य चतुर्दिक् समुन्नयनं वैश्विकस्तरे कथं कर्तुं शक्येतेति। पद्मश्रीः चमूकृष्णशास्त्री उक्तवान् यत् संस्कृतस्य






उत्कर्षे एव अस्माकम् उत्कर्षोऽपि सन्निहितः स अद्यतनयुगे प्राचीनशास्त्रैः सह आधुनिकानां शास्त्राणामपि अध्ययनम् अपि भवेत् । अस्मिन् भव्ये समारोहे केन्द्रीयसंस्कृत विश्वविद्यालयेन प्रकाशितानां महत्त्वपूर्णग्रन्थानां 'अरविन्द चरितम्', 'कुवलय कौमुदी', 'श्रीमद्भगवद्गीता' इत्येषां विमोचनम् अपि जातम्।

## संघकार्यालये द्वारा धरमपुरदेहरादूने चर्चागोष्ठी सम्पन्नाः

देहरादून। 31 अगस्त 2024 दिनाङ्के रविवासरे क्षेत्रसङ्गठनमन्त्री देवेन्द्रपाण्ड्या संस्कृतभारतीदेहरादूनस्य अधिकारिभिः सह हरिद्वारनगरे आयोजितस्य अखिलभारतीयसम्मेलनस्य सज्जतायाः विषये संघकार्यालये धरमपुरदेहरादूने चर्चा कृतवान्। उक्तसम्मेलने सम्पूर्णभारतस्य





१२०० संस्कृतविद्वांसः संस्थानां प्रतिनिधयः च उपस्थिताः भविष्यन्ति तथा च संस्कृतस्य प्रचारार्थं कार्ययोजनां निर्मितं भविष्यति। संस्कृतभाषायाः विस्तारसम्बद्धाः विविधाः पक्षाः अपि चर्चां करिष्यन्ति। अस्मिन् अधिवेशने भारतसर्वकारस्य राज्यसर्वकारस्य च प्रतिनिधयः अपि उपस्थितः भविष्यन्ति। देहरादूनस्य कार्यकर्तारः अधिवेशनस्य व्यवस्थां करिष्यन्ति। अस्मिन् सत्रे संस्कृत भारती देहरादूनस्य जिलाध्यक्षः डॉ. रामभूषणबिजल्वाणः, महानगरमंत्री आचार्य माधवपौडेलः, जिलामंत्री प्रदीपसेमवालः, विभागसंयोजकः नागेन्द्रव्यासः, खंडसंयोजकः डोईवाला डॉ. आनन्दजोशी, रायपुर खंडसंयोजकः धीरजबिष्टः, डॉ. बीनापुरोहितः, श्वेतारावतः, नीतीशमैठानी, किशोररावतः कार्यकर्तारः उपस्थिताः आसन्।

# संस्कृतसप्ताहमहोत्सव: भव्यतया सुसम्पन्न:

**-प्राङ्गेशकुमारमिश्र:**

चातुर्वेदसंस्कृतप्रचारसंस्थानम् इत्यस्य उत्तरप्रदेशकार्यकारिण्या आगामिसंस्कृतदिवसोपलक्ष्ये संस्कृतसप्ताहमहोत्सव: समायोज्यते। महोत्सवेस्मिन् प्रथमदिवसे १५/०८/२०२४ दिनाङ्के गुरुवासरे उद्घाटनमहोत्सव: भव्यतया सुसम्पन्न:। महोत्सवेस्मिन् मुख्यातिथिरूपेण




समुपस्थिता: केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीया: कुलपतय: प्रो. श्रीनिवासवरखेडीमहोदया: सभां सम्बोधयन्त: सर्वेभ्य: संस्कृतसप्ताहस्य स्वतन्त्रतादिवसस्य शुभकामना: प्रदाय अवोचन् यत् अयं संस्कृतदिवसो न केवलमेकस्मिन्नेव दिवसे वर्तते, अपितु अस्माकं कृते सर्वदैव संस्कृतदिवसो वर्तते। अस्माभि: सर्वदा संस्कृतस्य प्रचाराय प्रसाराय च कटिबद्धैर्भाव्यम्। संस्कृतभाषाया: कृते संस्कृतशास्त्राणाञ्च कृते समाजे जनानां मनसि या दासता वर्तते, सा दासता यावन्न दूरीक्रियते, तावदस्माकं पूर्णा स्वतन्त्रता न जायते। अस्माभि: विविधयोजनाभि: समाजे जागरणं कर्तव्यं वर्तते, एतस्य कृते सातत्यमपेक्षते। अत एवायं महोत्सव: उपलक्षको वर्तते संस्कृतसाधनाया:। अनेन वयमुर्जान्विता भूत्वा सततं संस्कृतकार्यरता भवाम:। विशिष्टातिथिरूपेण चातुर्वेदसंस्कृतप्रचारसंस्थानस्य राष्ट्रीयाध्यक्षा:, संम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य दर्शनसंकायाध्यक्षचरा: प्रो. हरिप्रसादोधिकारिमहोदया उक्तवन्तो यत् संस्थानमिदं विगतेषु पञ्चविंशतिवर्षेषु न केवलम् उत्तरप्रदेशे एवापितु भारतस्य विभिन्नेषु प्रान्तेषु प्रचारयात्रामाध्यमेन संस्कृतस्य प्रचारं प्रसारञ्च कृतवान्। भारतीयवैभवज्ञानपरीक्षामाध्यमेन संस्थानमिदं नगरे नगरे गत्वा नैकेषु विद्यालयेषु परीक्षामायोज्य भारतीयज्ञानपरम्पराया: भारतीयसंस्कृतेश्च जनमानसेषु प्रसारं कृतवान्। अग्रेपि अनेन संस्थानेन सततं संस्कृतसेवा विधास्यते इति कामये।

अध्यक्षतां निर्वहन्त: संस्थानस्य प्रदेशाध्यक्षा:, सारनाथस्थस्य केन्द्रीयोच्चतिब्बतीसंस्थानस्य संस्कृतसङ्कायाध्यक्षाश्च प्रो. धर्मदत्तचतुर्वेदिमहोदया: स्वकीयाध्यक्षीयोद्बोधने उक्तवन्तो यत् आधुनिकसमाजे संस्कृतप्रचारस्य महती आवश्यकता वर्तते। अस्माकं संस्कृतसमुपासकानां संस्कृतप्रचारकाणां संख्या अत्यल्पा वर्तते। अत: अस्माकमुपरि महान् भार: अस्ति। इदानीं चातुर्वेदसंस्कृतप्रचारसंस्थानस्योपरि संस्कृतसेवाया: महत् दायित्वं वर्तते, अतो वयं संकल्पिता भूत्वा एतत्कृते कार्यं कुर्म:। कार्यक्रमे समागतानां स्वागतव्याहृति: संस्थानस्योपाध्यक्षै: बागपतस्थै: डॉ. अरविन्दकुमारतिवारिमहोदयै: कृता। मध्ये जालौनजनपदस्य जियाकुमारी छात्रा सुमधुरं संस्कृतगीतं प्रस्तुतवती। कार्यक्रमस्य प्रारम्भ: चतुर्वेदमङ्गलाचरणै: जात:। तत्र ऋग्वेदीयमङ्गलं श्रीविकासपाण्डेयमहोदयेन, यजुर्वेदीयमङ्गलं डॉ. रङ्गनाथत्रिपाठिमहोदयेन, सामवेदीयमङ्गलं डॉ. विजयकुमारशर्ममहोदयेन, अथर्ववेदीयञ्च मङ्गलं श्रीराजनत्रिपाठिना आचरितम्। पौराणिकं मङ्गलं संस्थानस्य प्रदेशकोषाध्यक्षेण डॉ. पवनकुमारपाण्डेयमहोदयेन आचरितम्।

अन्ते च डा. शिवानन्दमिश्रमहोदयेन शान्तिपाठ: कृत:।

सम्पूर्णस्य कार्यक्रमस्य सञ्चालनं संयोजनञ्च संस्थानस्य प्रदेशमहासचिवेन डॉ. प्राङ्गेशकुमारमिश्रेण धन्यवादज्ञापनञ्च राष्ट्रीयमहासचिवेन डॉ. चन्द्रकान्तदत्तशुक्लेन अवसरेस्मिन् संस्थानसंरक्षिका डॉ. नवलता, उपाध्यक्षा प्रो. मञ्जुलताशर्मा, डॉ रीतातिवारी, डॉ श्रीनाथधरद्विवेदी, डॉ आभाद्विवेदी, डॉ. प्रभातसिंह:, डॉ तेजप्रकाशचतुर्वेदी, डॉ सर्वेशशाण्डिल्य:, डॉ अवनीन्द्रपाण्डेय:, श्रीखगेन्द्रमिश्र:, डॉ रमेशचन्द्रा, डॉ अभिषेकपाण्डेय:, डॉ रंजनलता, डॉ केशवपोखेल:, डॉ आदेशमिश्र:, डॉ रानीदाधीच, डॉ अम्बरीशमिश्र:, डॉ स्तुतिगोस्वामीत्यादय: संस्कृतसेवाव्रतिन: उपस्थिता आसन्।

अग्रिमे दिवसे १६/०८/२०२४ दिनाङ्के प्रतिशुक्लपक्षैकादशीप्रयुक्ता श्रीमद्रामायणकथाश्रिता राष्ट्रिया संगोष्ठी समायोजिता।इयं संगोष्ठी चातुर्वेदसंस्कृतप्रचारसंस्थानम् रानीपद्मावतीतारायोगतन्त्रमहाविद्यालय: शिवपुर: वाराणसी डी.ई.आई. दयालबाग आगरा इत्येतेषां संस्थानां संयुक्ततत्वावधाने आयोजिता। अस्यां गोष्ठ्यां मुख्यवक्तार: जी एम एच पी कालेज बगहा पश्चिमी चम्पारणबिहारस्थस्य संस्थापकप्राचार्या: डॉ. रविकेशमिश्रमहोदया:, विशिष्टवक्त्र्य: सनातनधर्ममहाविद्यालय: कर्णपुरस्य आचार्या: प्रो. शोभामिश्रमहोदया:, संयोजका: डॉ. चन्द्रकान्तशुक्लमहोदया:, सहसंयोजका: डॉ. कमलेशझा महोदया:, सञ्चालकाश्च डॉ. अभिषेकपाण्डेयमहोदयाश्चासन्। तृतीये दिवसे छात्राणां कृते सचिवानाम् आचार्यखगेन्द्रमिश्रमहोदयानां संयोजकत्वे चतुर्वेदसूक्तपाठप्रतियोगिता आयोजिता। अस्यां देशस्य विविधविद्यालयेभ्य: छात्रा: प्रतिभागं कृत्वा पुरस्कारं प्राप्तवन्त:। अत्र निर्णायकत्वेन डॉ. विजयकुमारशर्ममहोदया:, डॉ. रंगनाथत्रिपाठिमहोदया:, आचार्य विशालपाण्डेयमहोदया:, आचार्यराजनमिश्रमहोदयाश्चासन्। चतुर्थे दिवसे सचिवानां डॉ. सर्वेशकुमारशाण्डिल्यमहोदयानां संयोजकत्वे श्रीमद्भगवद्गीतासस्वरपाठप्रतियोगिता समायोजिता। अस्यां निर्णायकरूपेण प्रो.सुधाकरमिश्रमहाभागा:, प्रो. बीडी त्रिपाठीमहाभागा: डॉ. सूर्यकान्तत्रिपाठिमहाभागाश्चासन।

पंचमे दिवसे संस्कृतस्य विविधपक्षेषु आशुभाषणप्रतियोगिता आयोजिता। षष्ठे दिवसे सचिवानां डॉ. अवनीन्द्रकुमारपाण्डेयमहोदयानां संयोजकत्वे कालिदाससाहित्यमाश्रित्य छन्दोगानप्रतियोगिता आयोजिता। तस्मिन्नेव दिने सायंकाले राष्ट्रिया वेदसंगोष्ठी अपि आयोजिता। यस्या आध्यक्ष्यं काशिहिन्दुविश्वविद्यालयस्य आचार्या: प्रो. उपेन्द्रकुमारत्रिपाठिमहोदया: कृतवन्त:। मुख्यवक्तार: जम्मूविश्वविद्यालयस्य सहाचार्या: डॉ. सत्यप्रियप्रियदर्शीमहोदया: विशिष्टवक्तारश्च सुनीलकुमारविश्वकर्ममहोदया: आसन्। सप्तमे दिवसे समारोपकार्यक्रमे संस्थानस्योपाध्यक्षानां कविवराणां डॉ. अरविन्दकुमारतिवारिमहोदयानांसंयोजकत्वे अन्ताराष्ट्रियकविसम्मेलनम् आयोजितम्। कविसम्मेलनेस्मिन् पद्मश्रिय: प्रो. अभिराजराजेन्द्रमिश्रमहोदया:, प्रो. रामविनयसिंहमहोदयासमाअमेरिकात: श्रीकुशाग्र: अनिकेतमहोदया:, डॉ. पंकजझामहोदया:, डॉ. मनतोषभट्टाचार्यमहोदया:, श्रीदीपकमिश्रमहोदया: इत्यादय: स्वीयरचनां श्रावितवन्त:। सम्मेलनस्यास्य अध्यक्षतां संस्थानस्य प्रदेशाध्यक्षा: कविवरा: प्रो. धर्मदत्तचतुर्वेदिमहोदया: कृतवन्त:। समागतानां स्वागतं प्रो. मञ्जुलताशर्ममहोदयाभि: कृतम्। अस्मिन्नेव क्रमे विविधप्रतियोगितासु विजेतृभ्य: प्रतिभागिभ्य: पुरस्कारवितरणमपि सञ्जातम्। एवं रूपेण सप्ताहव्यापिसंस्कृतसमारोह: पूर्णतां गत:।

# पाणिनिसंस्कृतविश्वविद्यालये संस्कृतभाषाप्रशिक्षणवर्गस्य शुभारम्भ:

डॉ.दिनेश चौबे , उज्जयिनी

उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृत- वैदिकविश्वविद्यालयस्य विशिष्टसंस्कृत विभागस्य तत्त्वावधाने पञ्चदशदिवसीय: संस्कृतभाषाप्रशिक्षणवर्गस्य आरम्भ:२८ तमे दिनाङ्के योगेश्वरश्रीकृष्णभवने सञ्जात: । उद्घाटनसमारोहे मुख्यातिथिरूपेण शासकीयकालिदासबालिकास्नातकोत्तरमहाविद्यालयस्य प्राचार्या प्रो. वन्दनागुप्तामहोदया संस्कृतस्य महत्त्वं व्याख्याय उक्तवती यत् संस्कृतं भाषाणाम् अलङ्काररूपा अस्ति। सा कार्यशालाया: प्रशंसाम् अकरोत्, सर्वेभ्य: संस्कृतभाषाप्रशिक्षणार्थं च प्रेरितवती। कार्यक्रमस्य संरक्षक: कुलगुरु: प्रो.विजयकुमारसीजीमहोदय: उक्तवान् यत् 'संस्कृतं वद आधुनिको भव' इति सङ्कल्पेन वयं सर्वान् संस्कृतं पाठयाम: प्राचीन-आधुनिक ज्ञानस्य च मिश्रितं रूपम् अस्ति संस्कृतस्य। कार्यक्रमे कुलसचिव: प्रो. दिलीपसोनीमहोदय: ,छात्रा:, शिक्षका:, सामाजिकजना: च उपस्थिता: आसन्। कार्यक्रमस्य समन्वयिका ,प्रशिक्षिका च डॉ. पूजा उपाध्यायमहोदया अस्ति। उद्घाटनकार्यक्रमस्य सञ्चालनं आभाषेन आभारप्रदर्शनञ्च जया द्विवेदिना कृतम्। कल्याणमन्त्रेण सह कार्यक्रम: संपन्न: अवभत्।



# कालिदासोऽभिराजः



**प्रो. ताराशंकरशर्मा पाण्डेयः**

**द्रोणीग्रामेऽभिजातः**

श्रीरामानन्दपुत्रद्विजवरसुकुलाच्छ्रीलदुर्गाप्रसादाद्
द्रोणीग्रामेऽभिजातः स्मितमधुरमुखो योऽभिराजीसुकुक्षौ।
पञ्चम्यां कृष्णपक्षे नवनवरसखे वत्सरे पौषमासे
ख्यातो राजेन्द्रनाम्ना त्रितनयनिकरे मध्यमो भ्रातृराजः।।1।।

**भाति राजेन्द्रमिश्रः**

मातुः शक्त्याभिराजोऽभिनवनवरसः काव्यशक्त्याभिरामः
काव्योद्बोधेऽविरामोऽधिगमपरिचयः प्राप्तशास्त्राधिकारः।
ज्ञानद्रोणीविलासो गुरुगणगरिमा शब्ददुर्गाधिवासो
वागारामाधिराजोऽर्थविकसितिनिधिर्भाति राजेन्द्रमिश्रः।।2।।

**काव्यराजेन्द्रमिश्रः**

साक्षाद्वाणी वदान्या विलसति पुरतः प्रातिभे सौम्यरूपे
वाक्पुण्यश्लोकलोको रचयति सततं नैकवाचां कलेशः।
काव्यालापास्तदग्रे मधुमधुरतमा भान्ति साहित्यभूमौ
तत्प्रौढिं सन्दधानः कविकुलरमणः काव्यराजेन्द्रमिश्रः।।3।।

**यस्त्रिवेणीति वित्तः**

काव्योपन्यासनाट्ये सुप्रथनप्रथितः प्रातिभाक्तो वरेण्यो
नानाकाव्यप्रणेता यशसि च धवलो यस्त्रिवेणीति वित्तः।
पद्मश्रीभूषितो यो गुणगणगणितो राष्ट्रभूषो हि जातः
श्रीमान् राजेन्द्रमिश्रो जगति विजयते सोऽभिराजोपनामा ।।4।।

**कौलपत्यं दधानः**

शिष्येभ्यो दत्तविद्यो नवनवविधिना भारतीपारदृश्वा
सम्पूर्णानन्दवाणीविविधचरणगे विश्वविद्यालयेऽपि।
आचार्यत्वेन सेवाकरणकुशलतः कौलपत्यं दधानो
जातो मान्यो विशेषो सुकविप्रतिनिधिर्लोकलोकप्रसिद्धः।।5।।

**काव्यकीर्तिः स जीयात्**

भाषांग्लीमैथिलीनां कविरमरवचा: श्रेष्ठसाहित्यकारो
मृद्वीका वाग्वधूटी च नवरसभरे गीतिकाव्ये मनोज्ञे।
यो दिव्यं देवभाषा-निधिमयि कृतवान् सन्महाकाव्ययुग्मं
साहित्याम्भोधिपूरो रचनविसृमरः काव्यकीर्तिः स जीयात्।।6।।

**कालिदासोभिराजः**

साहित्याकादमीतः सुकविरभिमतः प्राप्तवाचस्पतिर्यः
साध्वीविद्योत्तमाश्रीकविकुलगुरुणा तुल्यमेधाभिरूपः।
काव्यश्रीकालिदासोपमवरकविताकल्पवल्लीसमानः
संख्यावद्भिः समुक्तः सुमतिरभिनवः कालिदासोभिराजः।।7।।

**वन्दते विन्दते च**

काव्यास्वादप्रशस्ताभिगमविधिनिधेः प्राज्ञराजेन्द्रमिश्रात्
कारुण्याकूतिमिश्रं करयुगलपुटात् प्राप्तुकामोस्ति नित्यम्।
आशीराशिञ्च भद्रं भवदभिमुखतः शर्मपाण्डेयनामा
त्वा ताराशंकरोयं प्रणयनतशिरा वन्दते विन्दते च।।8।।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-प्रतिनवबाणभट्ट-
पण्डित-श्रीमोहनलालशर्मपाण्डेयात्मजेन
श्रीकल्लाजीवैदिक-विश्वविद्यालय-कुलपतिना प्रोफेसर(डॉ.)
ताराशंकरशर्मपाण्डेयेन प्रणीतं 'कालिदासोभिराजः' नाम
'अभिराजराजेन्द्रप्रशस्तिकाव्याष्टकं' सम्पूर्णम्।

# सेयं कन्या सकलभुवने विद्यते भो ! वरेण्या



डा. प्रियव्रतमिश्रः
सहाचार्यो व्याकरणविभागे
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी

स्रष्टुर्याद्यं विमलसृजनं या हि हेतुः समन्तात्
यस्याः क्रोडे प्रकृतिरखिला दीव्यतीहैव शश्वत् ।
या वै मूलं निखिलजगतो तत्त्वतश्श्लाघनीया
सेयं कन्या सकलभुवने विद्यते भो ! वरेण्या ।।१।।

माता सेयं निजपरिजने सा स्वसा कन्यका वा
भार्या सैषा परिचितिरहो ! मानमेवान्वयस्य ।
सौख्यं भूयस्तनुत इह भोः ! शर्मदा सर्वदा सा
सेयं कन्या सकलभुवने विद्यते भो ! वरेण्या ।।२।।

साभुञ्जाना निजसुतसुता भोजयत्यत्र शश्वत्
जीर्णं वस्त्रं स्ववपुषि मुदा नूतनं पुत्रगात्रे ।
त्यागस्यैवानुकृतिरबला सा सदा वन्दनीया
सेयं कन्या सकलभुवने विद्यते भो ! वरेण्या ।।३।।

रक्षासूत्रं मुदितमनसा साशयं नह्यतीदं
सोल्लासं सा नमति च विभुं भ्रातृमांगल्यकामा ।
नो नो बन्धो ! कथमपि पुनर्नैव सा पीडनीया
सेयं कन्या सकलभुवने विद्यते भो ! वरेण्या ।।४।।

सावित्री सा पुनरपि सखे ! सा धरित्री
पुरन्ध्री गायत्री सा जगति सकले सा विजेत्री च दात्री ।
प्रत्यक्षा सा सकलभुवने शक्तिरूपा प्रसन्ना
सेयं कन्या सकलभुवने विद्यते भो ! वरेण्या ।।५।।

# कन्यासुरक्षाष्टकम्



**-डॉ. अरविन्दकुमारतिवारी**

हं हो हुंकृतिकारिणामयमहो हुंकार एवोत्थितो
विश्वे निर्ममतां प्रदर्शयति हा नारीसुरक्षाकृते।
बंगाले गुणिनां स्थले जनमनःकेन्द्रे रवीन्द्रं गुरुं
ख्यातं शान्तिनिकेतनस्य कवितासंसर्जकं पश्यसि?
राज्यं यत्तु महात्मनां च महतां राष्ट्रोन्नतेर्भावनां
लोके दर्शयते समाजमनसां बंगाभिधं दर्शनम्।
तद्राज्यं तनयावनं न कुरुते पक्षं दुराचारिणां
चादत्ते भुवि विस्मयं वितनुते निर्लज्जतां हाति नो।। २
राजामोहनरायरक्षितमिदं श्रीकेशवारक्षितं
विद्यासागरबुद्धिपालितमहो राज्यं विशालं प्रियम्।
छात्रान्दोलनमुत्थितं परहिते दृष्ट्वापि नो चेतते
बोसानां सुयशः क्षिणोति निखिलं दुःशासनं बंगजम्।। ३
उग्रं रूपमिदं विलोक्य हृदयं कस्यापि नो कम्पते
कन्यानां भुवि रक्षणाय रचितं दृश्यं समाजे नवम्।
किन्त्वेतद् वदतीव नैव समये न्यायं यतः सत्वरं
मार्गे भीषणमस्ति भावभरितं भूयो जनान्दोलनम्।।४
नेतारोऽपि मताप्तये पथि मुदा कन्यासुरक्षाकुला
दृश्यन्ते तनयासुरक्षणकृते नैते क्वचिद् व्याकुलाः।
नाट्यं संरचयन्ति भारतसुतासंरक्षकाः सर्वथा
दृश्यं बंगभुवो ब्रवीति कवयः! किं किं न दुःखं महत्।। ५
बंगालो न हि केवलः सुमतयो यत्र क्वचिद् दानवाः
सर्वत्र प्रसरन्ति कीटकसमाः कन्याजनाघातकाः।
संरच्यः प्रविधिर्यतो नियमनं भूयाद् बलात्कारिणां
मृत्योर्दण्ड इवाद्वयः सुविधिना देयः सदा दुष्कृताम्।। ६
मन्ये किं परिवर्तनं सपदि भोः सन्द्रक्ष्यते चक्षुषा
यस्मान्नैव सुता भवेयुरधुना चिन्ताकुला वा स्त्रियः।
भूयादेव नवा न कापि घटना चौर्यविधा भारते
श्रीमन्तो विधिशोधका विपदि भो कुर्वन्तु यत्नं ध्रुवम्।। ७
कश्चिन्नो तनयाविपक्षविषयं सम्भाषतां शासको
नो कश्चिद् विधिविद्यया भवतु वा देशेऽभिवक्ता बुधः।
कारागारगृहे स दानवमतिश्चाजीवनं सम्भ्रमेद्
वा गच्छेद्यमराजसेवकजनैराकृष्यमाणो मृतिम्।। ८
बंगालभूमौ तनयासुरक्षा दृढा भवेन्निर्ममता न भूयात्।
आन्दोलनं छात्रकृतं विशालं दृष्ट्वाष्टकं संरचितं मयापि।। ९
यो वा पठेदष्टकमेकमेतत् कन्यासुरक्षाविषयानुकूलम्।
कुर्याज्जनान्दोलनमेकमेव राज्ये निजे भारतभूषणाय।। १०

**जन्माष्टमी-पर्वणि श्रीकृष्णार्पणमस्तु।**
**सर्वेभ्यो योगेश्वरभक्तेभ्यो हार्दिक्यः शुभकामनाः सन्तु।**
**हे योगेश्वर! कृष्ण! राष्ट्रतनया हृच्चौर! रक्षेश्वर!**

नायोध्यास्ति सुरक्षिता भुवि हरे! श्रीगोकुलं हे प्रभो!
नैवेयं मथुरा न चास्ति भगवन्! मोदावहा काशिका।
एषा श्रीयमुनापि हन्त मनुजैः सन्दूषिताहर्निशं
हे योगेश्वर! कृष्ण! दिव्यवसुधां हृच्चौर! रक्षेश्वर! १
राष्ट्रेऽस्मिन् विचरन्ति देव! दुहितुर्हा शत्रवोऽसङ्ख्यका
ये घ्नन्तीव सुतां हरन्ति दनुजा दुःशासनाख्याः खलाः।
हे देवेश! महाप्रभो! कुघटना लक्ष्यन्त एवंविधा
हे योगेश्वर! कृष्ण! भारतभुवं हृच्चौर ! रक्षेश्वर! २
कंसाः सन्ति सहस्रशः कलियुगे विध्वंसका भारते
चान्ये सन्ति महासुराः कतिपये धूर्ता जगत्पीडकाः।
वंशीरावमये प्रियं मुरलिकापाणे! मुहुः श्रावय
हे योगेश्वर! कृष्ण! गोपललना हृच्चौर! रक्षेश्वर! ३
कन्योद्धारपरायण! द्रुतमये! पातुं स्वकन्या इमा
धृत्वा रूपमहो चमत्कृतिशतं नो दर्शयन् दृश्यसे?
कं भागं प्रिय! वर्णयानि भगवन्! देशस्य कन्यादृशा
हे योगेश्वर! कृष्ण! देशतनया हृच्चौर! रक्षेश्वर! ४
राष्ट्रं भारतवर्षमद्य कुरुते नित्यं महाभारतं
कश्चिन्नैव महारथी न च भवान् वा सारथिः सङ्गरे।
कर्णः कर्णयुगं पिधाय रमते दुर्योधनस्येच्छया
हे योगेश्वर! कृष्ण! भारतसुता हृच्चौर! रक्षेश्वर! ५
वृद्धो द्रोणगुरुर्विषीदति रणे भीष्मेण साकं कृपा-
चार्यः पश्यति हन्यते कुरुकुलं नित्यं निजैर्बान्धवैः।
भूपोऽन्धो न हि चेतते गुणिजनैः सम्प्रेरितो लोभतो
हे योगेश्वर! कृष्ण! विश्वतनया हृच्चौर! रक्षेश्वर! ६
लब्ध्वा जन्म वटस्य पत्रपुटके बालश्शयानः पुन
'भाद्रे भद्रजनानवेति महतामाराधनीय! प्रभो!
धर्मं रक्ष कवीन्द्रसेव्य! सपदि श्यामाऽविलम्बं हरे!
हे योगेश्वर! कृष्ण! वन्द्य! तनया हृच्चौर! रक्षेश्वर! ७
लीला लास्यमयी नृलोकललनालीलां जयेदुज्ज्वला
देशे नस्तव पूजनीय! मनुजा वृन्दावनावासिनः।
काङ्क्षन्तीव मुहुर्मुहुर्विगलिताश्चक्रिन्! सुजन्माष्टमीं
हे योगेश्वर! कृष्ण! राष्ट्रतनया हृच्चौर! रक्षेश्वर! ८
कृष्णजन्माष्टमी भूयात्कन्यानां रक्षिका शुभा।
प्रजानां पालिनी राष्ट्रे दुष्टानाञ्च विनाशिनी।।
अरविन्दकृतं नव्यं कविकर्मविभावकम्।
कृष्णाष्टकमिदं साधून् सुकवीन्नन्दयेद् ध्रूवम्।।

**-डॉ. अरविन्दकुमारतिवारी**

# निगमानन्दवर्याय नमोवाकं समर्पये



**प्रो. बनमाली बिश्वालः**

जयतात् निगमानन्दः सरस्वत्युपनामकः।
तं परिव्राजकं वन्दे परमहंससंज्ञकम्।।
तन्त्रे ज्ञाने तथा योगे यस्य सिद्धिर्महीयसी।
प्रेम्णि भक्तौ च तस्यासीत् सिद्धिश्चतुर्विधा पुनः।।
स्वसाधनानुभूत्या च रचितं ग्रन्थपंचकम्।
ज्ञानं योगस्तथा तन्त्रं भक्तिश्च विषयः क्वचित्।।
ब्रह्मचर्यपरो ग्रन्थो लोकानामुपकारकः।
बंगभाषा-प्रणीतास्ते ग्रन्थाश्चाध्यात्मिकास्समे।।
यदा प्रियतमा पत्नी चासमये दिवंगता।
तन्त्रविद्या तदावाप्ता दर्शनाय प्रेतात्मनः।।
संघे शक्तिरिति त्वस्मिन् वादे विश्वसिति च यः।
तन्त्रविद्याविदं वन्दे वन्दे योगविशारदम्।।
समाधौ निर्विकल्पे च यस्य सिद्धिर्महत्तमा।
तं युगपुरुषं वन्दे निगमानन्दठाकुरम्।।
कल्पितं च गुरोः स्थानं सर्वोपरि महात्मना।
इष्टदेवे गुरौ येन चाभेदत्वं प्रतिष्ठितम्।।
शंकराचार्यवर्यस्य ज्ञानं तेन समर्थितम्।
गौरांगस्यापि भक्तिस्तु तेन समर्थिता क्वचित्।।
निगमानन्दवर्याय नमोवाकं समर्पये।
धर्मस्सनातनो येन रक्षितोत्र प्रयत्नतः।।

---

श्रावणे श्रावणी ख्याता यदा च संस्कृतोदयः।
अतश्श्रावणमासश्च मासोस्ति संस्कृतस्य वै।।
भारतं मम देशोस्ति मम भाषा च संस्कृतम्।
भूषणं भारतस्यास्य संस्कारितं हि संस्कृतम्।।
अस्मिंश्च संस्कृते मासे मन्यते संस्कृतोत्सवः।
नगरे चत्वरे गेहे मुखरितं हि संस्कृतम्।।
मन्यते चाद्य सोत्साहं संस्कृताहश्च वैश्विकम्।
अद्य तु नद्यते डंका संस्कृतस्य गृहे गृहे।।
श्रावण्यां पूर्णिमायां च संस्कृतस्यैव शासनम्।
अध्ययनं च शास्त्राणां सम्भाषणं च संस्कृते।।
सप्ताहस्संस्कृतस्यायं राष्ट्रियश्चाथ वैश्विकः।
सम्भाषणं च संवादो व्याख्यानं च क्वचित् पुनः।।
शोभायात्रा च छात्राणां ग्रामे नगर-चत्वरे।
स्पर्धाश्चायोजिता नैका विविधाः प्रतियोगिताः।।
संस्कृतस्य महत्त्वं च युगेस्मिन् वरीवर्धते।
पठित्वा संस्कृतं भाषामाधुनिको भवेज्जनः।।
शिक्षानीतौ नवीनायां ज्ञानं भारतीयं नवम्।
तत्रापि संस्कृतस्यास्ति स्थानं किंचिद् विशिष्टकम्।।

# दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्!

कन्ये! भारतवर्षपुत्रि! तनये! शीघ्रं सुते! श्रूयतां
रक्षा नैव विलोक्यते तव पुनर्देशे ध्रुवं मन्यताम्।
साहाय्यं न विधास्यते ससमयं कैश्चित् क्वचिच्छासकै
'दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्।।१
दिल्ली-बङ्ग-महीकथा कथयते नो भारतं सक्षमं
कन्यां पातुमिदं सदा विलपनं हा कुर्वती भारती।
नित्यं सीदति शासकं मतिमतां पश्यन्त्यहो निर्भयां
दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्।। २
नेतारो जननायका जनहिते कार्याणि नो कुर्वते
प्रायस्ते मतलोभिनस्तु बहवोऽसत्यं श्रयन्ते बुधाः।
लब्ध्वा मन्त्रिपदं व्रवन्ति न कथं कन्यादशादर्शका
दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्।। ३
कन्यानां भुवि रक्षणं भवतु भोः! कन्याः पठन्तु ध्रूवं
राष्ट्रं भाषत एव भारतमिदं नः सर्वथा किन्त्वहो।
एते क्वापि मृतां विलोक्य तनयां व्यर्थं रुदन्त्युत्थिता
दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्।। ४
नारी शासनसंरतापि कुरुते कन्याभिरक्षां न ते
ब्रूतेऽनर्गलवाचमेव परुषां कश्चिन्महादुर्जनः।
इत्थं चौवमहो परीक्षणरताः संशेरते रक्षका
दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्।। ५
राष्ट्रे नो भुवि भारतं सुविदितं धत्ते महाभारतं
द्रौपद्याः पटहारि किं न दुहितः! भीष्मादिसंरक्षितम्।
आत्मानं यदि पातुमिच्छसि सुते! नीत्वा करेऽसिं नवं
दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्।। ६
पार्श्वस्था भयदायकाः किल मता नो दूरगामी जनः
सर्वं सम्प्रति मानसे प्रतिपलं मन्त्रं निधाय द्रुतं
विश्वासं न कुरुष्व पुत्रि! सुजने वा दुर्जने हा कलौ
दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्।। ७
एते राक्षसवंशजा दधति भोः पादं शनैर्मित्रवत्
पश्चाद्धन्त हरन्ति कामवशगाः प्राणान् युवत्याः खलाः।
खेलन्तीव ततः प्रशासकचणा वाचाधमा वाग्मिनो
दुर्गारूपमये धरस्व सहसोच्छेत्तुं शिरांसि द्विषाम्।। ८

**-डॉ. अरविन्दकुमारतिवारी**

# कन्यासुरक्षाः

डॉ राहुल पोखरियाल

कस्मिंश्चिद्धृदये प्रधावति कलौ कालुष्यधाराऽधुना
विश्वासो न हि मानवे प्रकुरुतात् सद्यः कथञ्चित् सुते।
संहर्तुं करयोः सपत्नमयि भोः शस्त्रं धरस्वात्मजे !
कालीरूपमहो पुनः कलियुगे धृत्वा समायातु रे।।

माता वा भगिनी सुता जगति सा रूपैर्विभिन्नैस्सदा
सम्पुष्णाति निजात्मनो जनकुलं सौख्यं विहाय स्वकम्।
बालां तामबलां विचिन्त्य रिपवश्छिन्दन्ति तां दुष्कृतात्
कालीरूपमहो पुनः कलियुगे धृत्वा समायातु रे ।।

नो जानन्ति तवाकृतिर्हि मलिनाः शक्तिर्न ते शत्रवः
तृष्णां पूरयितुं भुवि प्रमलिनां कुर्वन्त्यवद्यं च तत्।
मूर्खाः प्रीतिवचांसि नो विदुररे बाले कलारूपिणि
कालीरूपमहो पुनः कलियुगे धृत्वा समायातु रे।।

दृश्यन्ते पथि भावुकाः कतिपया न्यायं प्रदातुं सुते
तुभ्यं ये खलु रक्तलोचनजना आबालवृद्धाः समे।
शैथिल्यं हि नयालये तव कृतेऽस्तीदं मनः खिद्यते
कालीरूपमहो पुनः कलियुगे धृत्वा समायातु रे।।

दुष्टं तं जनताकरे सपदि हा यच्छन्तु भोः सैनिकाः
न्याये नैव विलम्बनं च भविताऽक्रोशस्तथा जायते।
किंकृत्यं न पुनर्विधास्यति खलो देयः प्रदण्डो महान्
कालीरूपमहो पुनः कलियुगे धृत्वा समायातु रे।।

बङ्गाले घटना विदारयति नश्चित्तं निकृष्टाऽधुना
मूकाः केचन सन्ति भव्यसदने पक्षे विपक्षे जनाः।
कृष्णो नैव समागमिष्यति नु ते संरक्षणाय स्वयं
कालीरूपमहो पुनः कलियुगे धृत्वा समायातु रे।।

चीत्कारस्तव न श्रुतो हि करुणे! केनापि सद्बन्धुना
क्वासन् कर्मकरास्तदा निशि चिरं मे शङ्कते मानसम्।
शिक्षन्तां तनयाः! भिया घटनया शीघ्रं स्वशक्त्या सुते!
कालीरूपमहो पुनः कलियुगे धृत्वा समायातु रे।।

तद्भाग्यं परिवर्ततां सुतनये! धात्राऽङ्कितं विष्टपे
शौर्येणैव विलिख्यतां प्रभुवने स्वं जीवनं पावनम्।
भीयासुर्विकरालघोषकरणात्तस्याः सपत्नाः! समे
कालीरूपमहो पुनः कलियुगे धृत्वा समायातु रे।।

# निर्मापय चण्डिकाम्



पंकज कुमार झा
वैद्यनाथधाम,
देवघरः, झारखण्डम्

श्रृण्वन्नस्मि सुहेमजुष्टधरणौ हेमो खगो लुण्ठितः
भिन्नः स्वर्णखगस्य पक्षयुगलो देशोऽस्मदीये मुहुः ।
यो देशोऽर्णवपारलंकनगरीं प्राज्वालयद्घोषितां
सम्मानेऽर्जुनकृष्णवादपरकं ख्यातं महाभारतम् ।। 1 ।।

स्वातन्त्र्यं कथनं कथन्नु भवताद्यत्रेदृशी घट्टनाः
घट्यन्तेऽनुपलं नृजातिकलुषं सन्दर्शयन्त्यः पुरः ।
निर्दोषासुचिकित्सिकात्महननं कृत्वाऽचलन् घातकाः
एवं तन्त्रमहद्विराजति वद, स्वातन्त्र्ययुक्ताः वयम् ? ।। 2 ।।

सिंहोऽस्ति स्वगृहे कुटुम्बसहितः स्वस्मै, भगिन्यै तथा
अन्येषां गृहलज्जरक्षणवतां कोलाहलो मा भव ।
कन्यारत्नमवाप्य प्रार्चतु मुदा हेया न, वन्द्या सुता
एषा धर्मसनातनात्मलसिता भूयात्सदा निर्भया ।। 3 ।।

रागाङ्गीं त्यज गृहण खड्गमुभयोः सन्दृश्य दुष्टान् दल
नैवायास्यति रक्षणार्थमिह ते कालीस्वरूपं धर ।
नीत्वा सिक्थसुवर्तिकां प्रतिगृहात् मिथ्येह संवेदना -
मुद्दिश्य प्रभवश्चलन्ति पशवः तेभयः सुदूरे भव ।। 4 ।।

हिन्दो ! रक्ष भुशुण्डिकादिपरमं शस्त्रास्त्रयुक्तं चयं
मास्तु क्वापि निवेदनं सुललितां वाचं मुधा सन्त्यज ।
नृत्यं गीतप्रदर्शनादिरहितं रक्षात्मनः शिक्षय
पुत्रीं वा भगिनीं कलत्रसहितां निर्मापय चण्डिकाम् ।। 5 ।।

# हे कन्यके!



डॉ.शशिकान्ततिवारीशशिधरः

दुष्टा नित्यमहो भ्रमन्ति दनुजा अस्मिन्समाजे खला
निर्लज्जाः पशुजाः कुकर्मलसिता धूर्ता दुराचारिणः।
नैतेभ्यो भवनं सुरक्षितमहो राष्ट्रं समाजश्च नो
त्यक्त्वा कोमलतां धरेर्निजकरे खड्गं सदा कन्यके!।।01।।
नैवं दीनवचो वदेः रुदिहि नो देहञ्च नो कम्पये:
नैवं कामपि याचनां कुरु च नो भीतिञ्च चित्ते धरेः।
स्मृत्वा नैजबलं दलञ्च खलिनां त्वं नाशयेर्मर्दये:
त्यक्त्वा कोमलतां धरेर्निजकरे खड्गं सदा कन्यके!।।02।।
या शक्तिर्महिषासुरं हतवती हा! रक्तबीजन्तथा
दुष्टौ तौ मधुकैटभौ बलिवरौ हा! चण्डमुण्डौ खलौ।
सा शक्तिस्त्वयि राजते निजबलं जानीहि शीघ्रं सुधे!
त्यक्त्वा कोमलतां धरेर्निजकरे खड्गं सदा कन्यके।।03।।
रक्षार्थन्तव नागमिष्यति नरो मूल्यङ्गतं सर्वतो
मूकान्धत्वमहो! गतोथ मनुजः क्लैव्यं समाजो गतः।
सर्वे पाण्डवसन्निभा द्रुपदजा त्वं वर्त्तसे हे शिवे!
त्यक्त्वा कोमलतां धरेर्निजकरे खड्गं सदा कन्यके।।04।।
तावत्स्त्री बहुपूजिताभवदहो! राष्ट्रे निजे भारते
यावद्दण्डविधानमत्र प्रबलञ्चासीद्यदा शासने।
भ्रष्टाचाररतं कुशासनमिदञ्जातं महद्दुर्बलं
त्यक्त्वा कोमलतां धरेर्निजकरे खड्गं सदा कन्यके।।05।।
त्वं दुर्गा भव कालिका भव तथा चण्डी भवानी शिवा
दुष्टान्मारय दण्डये: खलवरान्सन्नाशये: पापिनः।
ग्रीवां भञ्जय तस्य यस्त्वयि यदा कुर्यात्कुदृष्टिं शुभे!
त्यक्त्वा कोमलतां धरेर्निजकरे खड्गं सदा कन्यके।।06।।
जायन्ते घटना इमा प्रतिदिनं श्रुत्वा मनो खिद्यते।
तत्पृष्टे तु कुटुम्बिनः परिचिताः प्रायो भवन्तीह हा!।
रक्षा ते त्वयि निर्भरास्ति भव रे त्वं निर्भया निर्भये!
त्यक्त्वा कोमलतां धरेर्निजकरे खड्गं सदा कन्यके।।07।।
ज्ञात्वा कोलकताविभत्सघटनां हा मे मनो रोदिति
जाता मानवताधुना विपतिता जाताः पिशाचा नरः।
श्रुत्वा त्वं शशिकान्तगर्जनमहो! सम्पठ्य काव्यं नवं
त्यक्त्वा कोमलतां धरेर्निजकरे खड्गं सदा कन्यके।।08।।

# संस्कृते किन्न विद्यते

संस्कृते भारतीयत्वं संस्कृते सत्यनिष्ठता।
संस्कृते त्यागसन्तोषः संस्कृते किन्न विद्यते।।1।।
संस्कृते शस्त्रशास्त्राणि संस्कृते धर्मसंस्कृतिः।
संस्कृते ज्ञानगाम्भीर्यं संस्कृते किन्न विद्यते।।2।।
संस्कृते विश्वविज्ञानं संस्कृते विश्वचिन्तनम्।
संस्कृते विश्वकल्याणं संस्कृते किन्न विद्यते।।3।।
संस्कृते वेदराशिश्च संस्कृते काव्यसागरः।
संस्कृते शास्त्रसत्पुञ्जः संस्कृते किन्न विद्यते।।4।।
संस्कृते कर्मसूत्रञ्च संस्कृते कामसूत्रकम्।
संस्कृते मोक्षसूत्रञ्च संस्कृते किन्न विद्यते।।5।।
संस्कृते मुनयस्सिद्धाः संस्कृते च विशारदाः।
संस्कृते गुरवश्रेष्ठाः संस्कृते किन्न विद्यते।।6।।
संस्कृते मानसम्मानं संस्कृते सर्ववैभवम्।
संस्कृते सौख्यशान्तित्वं संस्कृते किन्न विद्यते।।7।।
संस्कृते राष्ट्रमर्यादा संस्कृते राष्ट्रचिन्तनम्।
संस्कृते राष्ट्रभक्तिश्च संस्कृते किन्न विद्यते।।8।।
संस्कृते धर्मसाहित्यं संस्कृते पूतभावनम्।
संस्कृते विश्वकल्याणं संस्कृते किन्न विद्यते।।9।।
संस्कृते राममर्यादा संस्कृते कृष्णगीतकम्।
संस्कृते लक्ष्मणोत्सर्गः संस्कृते किन्न विद्यते।।10।।
संस्कृते भारतन्यासः संस्कृते प्राक्सुकल्पना ।
संस्कृते नव्यता नित्यं संस्कृते किन्न विद्यते।।11।।

# ।। नारी-पीडा ।।



डॉ. पूजा कुमारी
वैद्यनाथ धाम,
देवघरः, झारखण्डम्

या नारी सुतजन्मनि प्रतिपलं स्वप्राणकैर्जञ्जति
अश्रु नैव सुनेत्रयोः शिशुमुखे स्वं जीवनं ढूंढति।
पीडाकालमुखे प्रमोदलसिता तोषस्थिरश्चेतसि
तस्यास्त्यागफलस्य ना विनिमये दत्तेऽत्र किं चिन्तय ।। 1 ।।

प्रत्येकं पुरुषस्य कृत्यफलकं नारी कथं भोक्ष्यति ?
पार्थ दण्डयितुं युगेऽम्बरपृथक् पार्थप्रियायाः कथम् ? ।
युद्धञ्चेन्नरयोः पराजितनरः, नार्यत्यहो गालिकां
पांचालीमधिकृत्यखेलनरतो न्याय्योऽस्ति किं तद्वद ? ।। 2 ।।

युद्धे वीरगतिं ह्यवाप्य पुरुषः स्वर्गेऽपवर्गायते
संसारे विधवाभिधानमहिला सर्वत्र दुःखायते।
जागर्ति त्वभिमान अत्र पुरुषस्याथ प्रमत्तायते
स्वातन्त्र्यं परमार्थकम्प्रभजते तासां विचार्याणतात् ।। 3 ।।

द्यूतादिव्यसने धनं महदिदं नंनश्यते मद्यपः
भाग्ये क्षुद्विदरिद्रता विलिखिता नार्याः मुधा मृग्यते ।
को दोषो भवतीह प्राप्य जननीरूपं मया मृश्यते
अन्तश्चेतसि मौनधारणपरं सर्वं सदा सह्यते ।। 4 ।।

सम्मानो यदि योषितां त्रिभुवने सम्पत्करस्थम्भवेत्
संग्रामो भवताद्धि चीरहरणे क्षाम्यो न ना-राक्षसः
रामो नास्ति बहिर्न रावणरहो ! सर्वोऽस्ति चान्तर्गतः
उद्दीप्ते भुवि रामरावणयुगे रामादिवद्वर्तय ।। 5 ।।

# छली प्रसीदतीह धर्मपालकश्च सीदति



डॉ. युवराजभट्टराई
समवाप्तसाहित्याकादेमीयुवपुरस्कारः

परोपकारतत्परैस्मि मित्रभावभावितः,
हितं यथायथं करोमि ते सखे! वदन् सदा।
स्वकीय-सर्वकर्म-साधनं विधाय निर्गतः,
निकृष्ट-कर्मसंरतस्य तस्य जीवने जयः।।१
सखे! मदीय-कर्म पूर्वमेव पूरये: प्रियः!,
ममान्तरे त्वदीयमस्तु सख्यभावधारिणः।
किमर्थमत्र चिन्तितौसि सवर्थास्मि ते सखा।
भणन् विलुण्ठ्य मां गतस्य जीवने जयौस्तु ते।।२
अभीष्टलक्ष्यशेखरे सखे स्वयं नयामि रे!
वृथा वदन् विमोहयन् निपातितश्च गर्तके।
स्वयं तु साधितं जनेन भद्रकं स्वजीवने,
कथं वदामि पुण्यकर्मणा जयामि जीवने।।३
उदात्तकर्मणः फलं छलेन तेन दीयते,
स्वलाभसाधने मदग्रतः स्म येन रुद्यते।
स एव पामरः पदेन गर्वितो महीयते,
छली प्रसीदतीह धर्मपालकश्च सीदति।।४
समर्थतास्ति तस्य कार्यसाधने तथापि मे,
करोति नैव कार्यसाधनं हितावहं ध्रुवम्।
मुखेन कथ्यते परं करोमि नूनमेव ते
प्रवञ्चि सख्यधर्मपालनं न तेन चर्यते।।५
कृतार्थतात्र पुण्यादास्ति मित्र बन्धुवर्गके,
मुखाग्रतो यदीयवागियं सदा विराजते।
तदा पुनः पुनः निगद्यते स्म नैव मान्यते,
स्वलाभसाधनात् परं जयो गतस्य वञ्चि ते ।। ६
सखे! हिताय तैप्यहं सुसाधयामि साधनम्,
गुणैरलङ्कृतौसि ज्ञान सौरभेण शोभितः।
सहायकौसि मत्कृते कुरुष्व मामकं हितम्,
वदन् गतस्य जीवने जयौस्तु ते जयौस्तु ते ।।७



# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!
सादरं नमोनमः।

वर्तमान समये संस्कृतभाषायाः अस्मद्राष्ट्रे एव न अपितु विदेशेष्वपि सांस्कृतिकम् ऐतिहासिकं, वैज्ञानिकं च महत्वं विद्यते। राष्ट्रस्य सर्वप्राचीना समृद्धा च भाषा सती अपि वर्तमाने संस्कृतस्य व्यावहारिकः वाग्व्यवहारः प्रयोगश्च न्यूनः एव। अतः समाजे संस्कृत महत्वं वर्धयितुं विश्वसंस्कृतदिवसस्य आयोजनं क्रियते स प्रायः एतद् आयोजनम् एकदिनस्य न अपितु पूर्णसप्ताहस्य वर्ततेस संस्कृतसप्ताहे विद्यालयेषु , महाविद्यालयेषु, विश्वविद्यालयेषु, गुरुकुलेषु , संस्कृत संवर्धन संस्थासु च नैका: कार्यशाला: विभिन्नकार्यक्रमा:, विविधा: संगोष्ठ्य:, प्रतियोगिता: च आयोज्यन्ते अथ च संस्कृतवाङ्मयेन संबद्धा: नैका: गतिविधय: च भवन्ति। अस्माकं राष्ट्रे 1969 तमे वर्षे सर्वप्रथमं संस्कृतदिवसः समाचरितः। नवदेहल्याम् आयोजिते प्रथमे कार्यक्रमे विषयः आसीद्द् 'संस्कृतं ज्ञानस्य भाषा'। तत्र कार्यक्रमेऽस्मिन् विश्वस्य संस्कृतविद्वांसः गणमान्यजना:, अनेके संस्कृतानुरागिणः महाविद्यालया:, विश्वविद्यालयाश्च भागम् अगृह्णन्। तदनु 2019 तमे वर्षे संयुक्तराष्ट्रशैक्षिकवैज्ञानिकसांस्कृतिकसंघटन-यूनेस्को द्वारा अंताराष्ट्रियसंस्कृतदिवस रूपेण समुद्घोष्य वैश्विकस्तरे संस्कृतभाषां तन्महत्वं च वर्धयितुं मुख्यं पदम् उपस्थापितम्। हिन्दुपञ्चाङ्गानुसारं प्रत्येकस्या: श्रावणीपूर्णिमाया: दिने विश्वसंस्कृतदिवस: समाचर्यते। अस्मिन् वर्षे एषः उत्सवः श्रावणस्य अन्तिमे सोमवासरे रक्षाबंधनेन सह समाचरितः। वस्तुतः संस्कृतसप्ताहः संस्कृतभाषाया: गौरवस्य उत्सवः । तदर्थं संस्कृतस्य समाजे प्रतिष्ठां दापयितुं विशिष्ट: उपक्रम: अयं प्रचक्षते। अनेन आयोजनेन संस्कृतस्य महत्वविषये जागरूकतावर्धनं तस्य अध्ययनाय प्रयोगाय च प्रोत्साहनं च प्रदीयते। संस्कृतम् एकेन सचेतनभाषारूपेण संरक्ष्य शिक्षायाम् अनुसंधाने च उपयोगाय, विज्ञानं, दर्शनं साहित्यं च प्रत्याधारितं संस्कृतस्य प्रभावं स्पष्टीकर्तुम् अतिरिक्त मानवीयगुणानां वर्धनाय, विश्वबन्धुत्वभावनाया: जागृतये च प्रथितं विद्यतेस एतद् अत्यन्तं हर्षास्पदं यद् भारतीयशिक्षानीतौ 2020 भारतीयसंस्कृतिं परम्परा: च अवधाय संस्कृतभाषायै अत्यन्तं महत्वं दत्तम् अस्तिस यस्य फलस्वरुपेण गतेभ्य: द्वित्रिवर्षेभ्य: संस्कृतसप्ताह: सविशेषम् उत्साहपूर्वकं समाचर्यते स अन्ते अस्मदीयेभ्य: समस्तेभ्य: संस्कृतविद्वभ्यो विद्यार्थिभ्य:, संस्कृतानुरागिभ्य: संस्कृतदिवसेन सहैव संस्कृतसप्ताहस्य च अनन्ता: शुभकामना: भूरिशो वर्धापनानि च।

भवदीया
सम्पादिका

### ।। वेद वाणी ।।

'न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ।।
या वो माया अभिद्रुहे यजत्रा: पाशा आदित्या रिपवे विचृत्ता: ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्स्याम।।

'Man is very ignorant and weak.He can't know what things lie to his right or left, in front or back. He also does not know what the right path is or the wrong one. He, should therefore, walk in the path shown by Gods and the wise and find the eternal light of wisdom."O! Revered Adityas! The bonds and illusion created by You ensnare the enemies that harm us. Sitting in a chariot, we cross all these obstructions, just as a seasoned horse-man overcomes all difficult obstacles. Protected thus, we become unharmed and live in our large and happy homes.'

The Rig Veda 2.27.11/16

'त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ।।
बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।।
मा न स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ।।

'This Brihaspati, with his resources of defence, helps his devotees cross their sorrows. He protects them from harm and hence men always call him for assistance. He never allows revilers of God live in comfort and completely destroys them.""Lord Brihaspati is known for accomplishing things in a simple way. Such a wonderful treasure granted by Lord Brihaspati, that is prized by the wise, that makes people radiant and makes them do auspicious deeds, and one that confers power and strength on people, may He confer such a great treasure on us too. ""Those who derive sadistic pleasure in treachery, who try to grab food of opponents, who oppose gods at heart, who other than uttering mere words of peace, know nothing more about divine power- may we never be afraid of such thieves. May we always be protected by You from them.'

The Rig Veda 2.23.8/15/16

**संकलन : एस.वासुदेव रावः**

# गङ्गातटवाञ्छा



-शिक्षाश्रीः डॉ. मञ्जूषा चन्ने ठेमदेवः
साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः, अगरतला

### प्रथमदृश्यम्

(गङ्गानद्याः परिसरः ------ दूरात् नद्याः प्रवाहध्वनिः श्रूयते ---------- हरगङ्गे ------- जयतु गङ्गामाता ------ नमः श्रीगङ्गायै ------- एवम् उद्घोषणाः कर्णपथमायान्ति। ततः मञ्चं प्रविशतः गङ्गानदीतटे उपविष्टौ दम्पती।)

विद्यावती- एहि एहि भोः! निवासस्थानं गच्छावः।

विद्याधरः- अस्याः सुरनद्याः तटात् गन्तुं नोत्सहेऽहम्।

विद्यावती ख्रहुँम्। मनोवाञ्छितं वाक्यं तव। कियान् रम्यः परिसरोऽयम्। बालार्ककिरणैः कान्तिमान् गङ्गायाः धवलप्रवाहोऽयं चित्तमाकर्षयति। नेत्राभ्यां पीयमानमिदं दृश्यम्। अये विद्याधर, मन्ये विश्वनाथनगरीं प्रति आगमनं सार्थकं जातमिति।

विद्याधरः-सत्यमिदम्। अस्याः सुरसरितः दर्शनेन एव अन्तःकरणस्थितं सर्वं कालुष्यम् अपगच्छति। अये पश्य, पश्य, मन्दवायुना कम्पमानं तं कमलसमूहम्। तस्मात् कमलसमूहात् वायुना विकीर्णाः परागकणाः गङ्गातटे चित्ररचनां कुर्वन्तीति भाति। जानासि नु, एषा स्वर्गापगा भगीरथेन अस्मिन् भूतले आनीता इत्यस्मात् 'भागीरथी' इत्युच्यते।

विद्यावती - जानेऽहम्। सा एव पुण्यसलिला पाताले (रसातले) 'भोगवती' नाम्ना विख्याता।

विद्याधरः-अये 'भवन्ति ते सुविख्याता भोग्यालङ्कारपूजिताः।
दर्शनं क्रियते गङ्गा सकृद् भक्त्या नरैस्तु यैः।।

'भूतलेऽस्मिन् अस्याः अस्तित्वमेव अस्माकं सौभाग्यम्' इत्यपि केचन कवयः आचक्षीरन्। महर्षिना आदिकविना वाल्मीकिना तु अत्रत्ये तरुकोटरे पक्षिरूपेण निवासः विधातव्यः अथवा अस्याः स्फटिकतुल्ये शुभ्रप्रवाहे मत्स्यरूपं कच्छपरूपं वा स्वीकृत्य वासः करणीय इति आकाङ्क्षा प्रकटीकृता।

इदं सर्वं भव्यं दिव्यं निसर्गसौन्दर्यं केन निर्मितं भोः? सा कीदृशी शक्तिः स्यादिति जिज्ञासा मनसि जायते।

विद्यावती ख्र तया जिज्ञासया समागताः साधकाः ज्ञानं सम्प्राप्य मुक्ताः भवन्ति। तस्मादेव अयं परिसरः 'ज्ञानभूमिः' इति प्रसिद्धः खलु। अत्र विहिता ज्ञानसाधना निश्चयेन सफला भवति।

विद्याधरः- अये विद्यावति, त्वया उचितमेव कथितम्। यथा गङ्गायाः परिसरः 'ज्ञानभूमिः' तथैव यमुनायाः परिसरोऽपि 'प्रेमभूमिः' इति कथयन्ति जनाः। यतः यमुनानद्याः परिसरे एव कृष्णप्रेम उत्फुल्लमासीत्। तथैव वयं यस्मात् क्षेत्रात् अत्र काशीक्षेत्रे विद्यार्जनाय आगताः तत्क्षेत्रमपि पुण्यप्रदायकम्।

विद्यावती - ततु वैराग्यस्य अधिष्ठात्र्याः नर्मदायाः क्षेत्रमस्ति नु। 'त्यागभूमिः' इत्यपि तस्य क्षेत्रस्य प्रसिद्धिः। तेन हि पुराकालात् सत्पुरुषैः, यतिभिः, निःस्पृहजनैश्च ज्ञानसाधनायै तदपि क्षेत्रम् नियुक्तम्।

विद्याधरः - वस्तुतः इमाः नद्यः जलरूपमूर्तयः एव।

विद्यावती - समुचितं कथितं भवता। ईश्वरकरुणया एव प्रवहन्ति एताः सरितः। आसां सरितां परिसरोऽयं ज्ञान-भक्ति-वैराग्यं शिक्षयति अस्मान्। तस्मात् मुक्तविद्यापीठमेव असौ नदीपरिसरः।

विद्याधरः - अयि भोः! वार्तालापं कुर्वन्तौ आवाम् आत्मवीरेश्वरस्य घट्टसमीपम् आगतौ। अये, तत्र पश्य कीदृशं दृश्यम्? पश्य, पश्य।

विद्यावती - किमिति? कुत्र? किमस्ति?

विद्याधरः - अये पश्य तत्र सोपानसमीपम्, प्रवाहस्य निकटे------ ।

विद्यावती-हुँ हुम्। शान्ततया कथं शयनं कृतमस्ति द्वाभ्याम्। तदपि प्रवाहसमीपम्।

विद्याधरः - मन्ये, कश्चित् यात्रिकः स्यात्।

विद्यावती - नहि नहि, तेषां वस्त्रपरिधानं तु धनाढ्यतां प्रदर्शयति।

विद्याधरः - आगच्छ पश्यावः, कौ तौ द्वौ? इति। ( अवलोक्य) मन्ये, ह्यः गुरोः पाठशालायां यस्य विषयः प्राचलत् तौ एव दम्पती स्यातां कदाचित्।

विद्यावती - अस्तु, गत्वा पश्याव तावत्। तयोः दर्शनेन पुण्यञ्च प्राप्नुवः।

### द्वितीयदृश्यम्

(गङ्गाप्रवाहस्य ध्वनिः समीपतः श्रोतुं शक्यते। नदीतटे शयितावस्थायाम् तौ दम्पती। दम्पत्योः समीपं गत्वा)

विद्यावती - हे देवि, क्षन्तव्याऽहम्। परं भवती प्रवाहस्य अतीव निकटे उपविष्टा वर्तते। निद्रावस्थायां किमपि भवितुमर्हति। अत्रैव समीपे उत्तमाः धर्मशालाः सन्ति। तत्र गत्वा निद्रां कर्तुं शक्यते खलु। एवं मुक्ताकाशे किमर्थम्?

लवङ्गी - आम्, योग्यमुक्तं भवत्या। किन्तु ईदृशे मुक्ताकाशे (मुक्ताङ्गणे) उपवेष्टुमेव मनीषा। यतो हि तत्सुखं विशिष्टमेव विद्यते। तत्तुल्यं सुखं न कुत्रापि अनुभूयते।

विद्यावती - तव कथनं यद्यपि सत्यं तथापि सार्वजनिकक्षेत्रमिदम्।

लवङ्गी - किन्तु आवयोः प्रियस्थानमित्यतः मनोविनोदः अत्रैव।

विद्यावती - इतःपूर्वमत्र न कदापि नयनपथगोचरौ। नवागतौ प्रायः अस्तु। किमपि साहाय्यम् अपेक्षते चेत् विना सङ्कोचं कथयतु।

लवङ्गी - कीदृशं सहाय्यम्? अत्र जगज्जनन्याः जाह्नव्याः कुक्षौ उपविशामः चेत् न किमपि आवश्यकम्।

जगन्नाथः - चिरनिद्रां कर्तुमत्र स्थिताः वयम्। भ्रामकसुखार्थं (भौतिकसुखार्थं) मातुः अङ्कस्य त्यागः कृतः आसीत् मया। सुखान्वेषणे निरतोऽहम्। परं यथार्थसुखप्राप्तिः न कुत्रापि जाता। अतोऽत्र आगमनम् ------।

अत्र मन्दवायुः वाति तस्मात् जगन्मातुः जाह्नव्याः कुक्षौ शान्ततया निद्रां प्राप्नुयाम्। 'चिरादुन्निद्रं मां सदयहृदये शायय चिरम्'।

विद्याधरः - भवन्तौ द्वावेव उपविष्टौ किल।

जगन्नाथः - आम्। परस्परेण सह भवावः आवाम्। ततः कीदृशं भयम्?

विद्यावती-भवान् न क्रुध्यति चेत् प्रश्नमेकं प्रष्टुकामा। के भवन्तः? कुतश्च समागताः?

लवङ्गी - अहमपि त्वां तमेव प्रश्नं पृच्छामि।

विद्यावती - आवां दक्षिणतः समागतौ। न्यायशास्त्रस्य अध्ययनं कुर्वः। अयं मे पतिः विद्याधरः। न्यायशास्त्रस्य कारिकाभाष्यविषये अस्य कश्चन सन्देहः आसीत्। अतः तं सन्देहं निवारयितुम् अत्रत्यं विख्यातं नैय्यायिकं प्रति आगमनम्।

जगन्नाथः - कः सः नैय्यायिकः? समादरणीयः दीक्षितगुरुः वा?

विद्याधरः - आम्। सः एव।

जगन्नाथः - चतुर्भ्यः दिनेभ्यः पूर्वं तेऽत्र समागताः आसन्। एवमेव प्रातःकालः आसीत्। अस्मान् एवं शयितं दृष्ट्वा उक्तवन्तः -'किं निःशङ्कं शेषे, शेषे वयसि त्वागतो मृत्युः' इति।

लवङ्गी- तेषामभिप्राय एवमासीत् यत् मृत्युः समीपमागतः अतोऽत्र शङ्कां विना शयिताः किम्? इति। किन्तु निकटमागत्य ते कविश्रेष्ठं ज्ञातवन्तः। तस्मात् तत्क्षणमेव स्वोक्तिं परिवर्त्य पुनरपि अगदन्-

जगन्नाथः -'किं वा सुखं शयीथाः निकटे जागर्ति जाह्नवी जननी' इति।

विद्याधरः- (आदरेण) महोदय, प्रश्नमेकं पृच्छामि किम्?

जगन्नाथः- अवश्यम्। स्वैरं पृच्छ त्वम्।

विद्याधरः - ननु भवान् पण्डितराजः जगन्नाथः?

जगन्नाथः - (विहस्य) पण्डितराजः जगन्नाथः।

विद्याधरः - दिल्लीसभागृहे स्वीयपाण्डित्येन विद्वत्तल्लजेषु अनन्यस्थानं लब्धवान् कविवर्यः भवान्। शासकादारभ्य सहृदयपर्यन्तं सर्वान् तोषयति स्म।

जगन्नाथः- भवान् तं पण्डितं परिचिनोति किम्?

विद्याधरः- केवलमेकवारं मथुरायां दृष्टवानस्मि। अधुना वार्धक्यचिह्नानि तावत् स्पष्टतया अवलोक्यन्ते।

जगन्नाथः - तव स्मरणशक्तिः समीचीना।

विद्याधरः - सत्यमेव, पण्डितराज: भवान्। स्मराम्यहं भवतः एकं श्लोकम् -

पातालं व्रज याहि वा सुरपुरीमारोह मेरोः शिरः
पारावारपरम्परास्तर तथाप्याशा न शान्ता तव।
आधिव्याधिजरापराहत यदि क्षेमं निजं वाञ्छसि
श्रीकृष्णेति रसायनं रसयते शून्यैः किमन्यैः श्रमैः।।

जगन्नाथः - आम्, स एव जगन्नाथोऽहम्। शास्त्राणि अधीत्य तदनुसारं नित्याचरणं करणीयमिति नियमं पालयामि स्म। दिल्लीशासकस्य सभायां मे तारुण्यं व्यतीतम्। ततः सर्ववासनात्यागं कृत्वा अहं सर्वशास्त्राभ्यासस्य सारः यः कृष्णः तस्य पदस्मरणार्थं मथुरायाम् आसम्। मां तत्रैव कदाचित् दृष्टवान् स्यात् भवान्।

विद्याधरः- भवितुमर्हति। मम स्मृतिपटले तु इतोऽपि काचित् उक्तिः वर्तते-

मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित्केषाञ्चिन्न खलु विदधीरन्नपि मुदम्।
ध्रुवं ते जीवन्तोऽप्यहह मृतकामन्दमतयो
न येषामानन्दं जनयति जगन्नाथभणितिः।।

विद्यावती - कस्य वर्णनमिदम्?

विद्याधरः - येषां समक्षम् उपविष्टौ आवां तैः रससिद्धकवीश्वरैः स्वकाव्यस्य माहात्म्यं गीतम्।

जगन्नाथः - (विहस्य) इयं दर्पोक्तिः केवलम्।

शेषभागः नवपुटे

अष्टपुटस्य शेषभागः

# गङ्गातटवाञ्छा

विद्याधरः - मधुरसः, द्राक्षारसः, साक्षादमृतं तथा च तरुण्याः अधरामृतं यावदस्मान् प्रमोदयति ततोऽप्यधिकं आनन्दप्रदानं जगन्नाथपण्डितस्य काव्यं विदधाति। जगन्नाथपण्डितस्य काव्यानां रसास्वादनं ये न कुर्वन्ति ते नरपशवः सन्ति। एवं सार्था उक्तिः येषां मुखात् निर्गता ते जगन्नाथपण्डिताः सपत्नीकः अत्रोपस्थिताः खलु। तयोः द्वयोः दर्शनमभवदिति अहोभाग्यम् अस्माकम्। विद्यावति, उभयं प्रणमतु।

जगन्नाथः - आयुष्मती भव। विद्यावती भव।

विद्याधरः - किन्तु महोदय, एवं वार्धक्यावस्थायाम् अत्र किमर्थम् उपवेशम्?

लवङ्गी - वस्तुतः पण्डितराजेन सह बहुधा जीवने सन्मानिताऽहम्। नानाविधसुखानि ततोऽनुभूतानि। अधुना तत्सर्वं नापेक्षितम्। ततः उदासीनौ आवाम्।

जगन्नाथः- सम्प्रति ईश्वरशरणमेव। -'त्वत्समो नास्ति करुणाकरः, मत्समो नास्ति मदोन्मत्तः'।

विद्याधरः - अस्ति किमपि आगमनप्रयोजनं गङ्गातटं प्रति?

जगन्नाथः - अस्ति खलु कारणम्। केचन तस्य सगुणपरमेश्वरस्य आराधनां कुर्वन्ति। कतिपयाः तस्य मूर्तिनिर्माणं प्रतिमानिर्माणं वा। केचित्तु जनाः अस्खलितोपचारं कृत्वा स्वपूज्यभावनाः निराकारेश्वराय समर्पयन्ति।

विद्याधरः- केचन गहनज्ञानसाधनायां रताः भवन्ति।

जगन्नाथः- ते तु निराकारब्रह्मणः ज्ञानस्य वा उपासकाः। तेन मार्गेण मया न गम्यते। मया तु पृथक् मार्गः एव स्वीकृतः।

विद्याधरः - कीदृशः सः मार्गः? जिज्ञासा मे वर्तते।

जगन्नाथः- भवतु। कथयाम्यहम्। वस्तुतः भवदुःखेन दग्धोऽहम् उपहासास्पदम् अभवम् जीवने। अतः सम्पूर्णपापशमनार्थम् अयं जगन्नाथः गङ्गायाः सान्निध्ये आगतोऽस्ति। 'पण्डितराज' इति प्राप्तोपाधिः तैलङ्गकुलान्वितः जगन्नाथः जगता बहिष्कृतस्सन् शीतलजलयुक्तेऽस्मिन् पावनगङ्गातीरे विश्रान्तिं स्वीकर्तुकामोऽस्ति। निराकृतिः गङ्गादेवता निश्चयेन मम दुःखशमनं कुर्यादिति मे विश्वासः।

निराकारं भजन्त्येके नराकारं यथापरे।
वयं संसारसन्तप्ता नीराकारं भजामहे॥

विद्याधरः-अहो कवित्वम्। भवतः कतिचन उक्तयः मम स्मरणपटले विराजन्ते। तत्रत्यः अभिमानोऽपि सार्थः विद्यते। भवता विद्यासाधनया, स्वीय-असामान्यप्रतिभया बालत्रिपुरसुन्दर्याः कृपया च अनन्यसाधारणस्थानं लब्धमस्ति। दुर्लभसन्मानभाजोऽस्ति भवान्।

दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः।
अन्यैः नृपालैः परिदीयमानं शाकाय वा स्यात् लवणाय वा स्यात्॥
ईदृशं केवलं भवता एव वक्तुं शक्यम्।

जगन्नाथः ख्र अधुना मम मनसि इदं किमपि नास्ति। सर्वे पुरस्काराः सन्मानाः तृणतुल्याः भासन्ते। सम्प्रति तु गङ्गानदी एव मां तारयिष्यति। यतो हि सा एव अनाथानां स्नेहिनी विगलितगतिषु पुण्यप्रदायिनी च वरीवर्ति। तथैव पतितलोकानाम् उद्धारकर्त्री, रुग्णानां कृते साक्षात् धन्वन्तरिः, पिपासितानां कृते अमृतसागरश्चास्ति एषा सुरनदी। तस्मात् गङ्गामातरं शरणाङ्गतोऽस्मि।

अनाथः स्नेहार्द्रां विगलितगतिः पुण्यगतिदां
पतन् विश्वोद्धर्त्रीं गतविगलितः सिद्धभिषजम्।
सुधासिन्धुं तृष्णाकुलितहृदयो मातरमयं
शिशुः सम्प्राप्तस्त्वामहमिह विदध्याः समुचितम्॥

सर्वे पुरस्काराः तृणसमानाः नगण्याः .चेति विचिन्त्य केवलं विद्याधनमेव प्रधानमिति मन्यमानाः अपि जनाः मम जीवने नयनगोचरीजाताः। परन्तु अहं तस्य विद्यानिधेः समुचितगौरवमपि नाकरवमिति खेदजनकम्।

विद्याधरः - कस्य विषये वदन्नस्ति भवान्?

जगन्नाथः - तस्य नाम अहं सम्यक् न जाने। षट्सु मासेषु एकवारं कदाचित् सः आगच्छेत् इति सर्वदा प्रतीक्षमाणः भवामि स्म। कदाचित्तु सः मत्तः सत्कृतः भवेदिति आसीत् मनीषा। परन्तु कुतः तादृशं सौभाग्यं मे? अहो, तस्य श्लाघनीया निःस्पृहता।

विद्याधरः - ते के आसन्?

जगन्नाथः - नामाभिधानं न जाने। तेषां भाषा केवलं स्मृतिपटले वर्तते। यदा दिल्लीराजसभायाम् आसं तदा अहमेव सर्वत्र सुख्यातोऽस्मि। लोके मां 'पण्डितराज' इति सम्बोधयन्ति। मम काव्यगौरवगाथां गायन्ति। एवं मां देशे सर्वे परिचिन्वन्ति इति भ्रमः आसीत्। किन्तु पण्डितराजोऽयं लज्जितः अभवत् तस्य महात्मनः पुरतः। मध्याह्ने सूर्ये तपति मम स्थानं दर्शितं तेन। स्मराम्यहं तां घटनाम्।

मया काकबलिदानार्थं गृहात् बहिः निर्गतमासीत्।

(- सङ्गीतम् - )

## तृतीयदृश्यम्

(जगन्नाथः मन्त्रोच्चारं कुर्वन्नस्ति।)

वैवस्वतकुले जातौ द्वौ श्याम-शबलौ शुनौ
ताभ्यां पिण्डो मया दत्तो रक्षेतां पथि मां सदा॥

(तदानीमेव कस्यचित् अतिथेः आगमनम्)

अतिथिः - पण्डितवर।

जगन्नाथः - को भवान्?

अतिथिः - अत्र जगन्नाथपण्डितः कुत्र निवसति?

जगन्नाथः - अत्रैव। अयं तस्य एव प्रासादः।

अतिथिः - तेन प्रासादे भूयते किम्?

जगन्नाथः - अहमेव जगन्नाथः।

अतिथिः - एवम्। नमस्काराः।

जगन्नाथः - नमस्काराः। कुतः आगम्यते?

अतिथिः - दक्षिणतः।

जगन्नाथः - कुत्र गन्तव्यम्?

अतिथिः - उत्तरदिशं प्रति।

जगन्नाथः - ईदृशे आतपे तदपि पादरक्षां विना अटनम्।

अतिथिः - सः तु विद्यासाधनायाः नियमः विद्यते। तपः विना विद्याप्राप्तिः नैव सम्भवति किल।

जगन्नाथः - कीदृशी विद्या अधीते? परम्परया सम्बन्धिता विद्या उत पाठशालासम्बद्धा।

अतिथिः - पण्डितराज! मध्याह्ने काकबलिं दातुं निर्गतः कश्चित् महापण्डितः द्वारे स्थितातिथिं विद्यायाः विवरणं पृच्छतीति न शोभते।

जगन्नाथः - क्षन्तव्योऽहम्। अन्तः प्रविशतु। इतः इतः एहि।

अतिथिः - प्रजापते न त्वदेतान्यन्यो विश्वजातानि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् - ।

जगन्नाथः - अहो, कियान् अर्थपूर्णः मन्त्रोऽयम्। सत्यमेव, इमानि वाक्यानि तु अस्माकं प्रार्थनाभिः परिपूर्णानि वर्तन्ते। लोकपालस्य इयं प्रार्थना। भवता तु कविना भूयते।

भवन्तं विना अस्य जगतः कः निर्माता स्यात् याभिः इच्छाभिः कामनाभिः वयं भवन्तं प्रार्थयामहे ताः पूर्णाः भवन्तु। अस्मभ्यं सम्पद्वितरणं करोतु इति ईशप्रार्थना।

अतिथिः - परं सः ईश्वरः तु सम्पत्प्रदानं कुर्वन्नैव अस्ति। नो चेत् एतस्मिन् विशाले प्रासादे मध्याह्नं यापयितुं कथं वा अवसरं प्राप्नुयाम्।

जगन्नाथः - साधु साधु। सर्वेश्वरः सः। भवतु, पाकशालां प्रति इतः आगच्छतु।

अतिथिः - अस्तु।

जगन्नाथः - मन्ये, भवतः कश्चित् सम्भ्रमः जातः। विद्याभ्यास इत्युक्ते कस्याश्चित् वेदशाखायाः अध्ययनं क्रियते वा इत्येव ममाभिप्रायः आसीत्।

अतिथिः - शृणोतु पण्डितराज, भोजनोत्तरमेव अस्मिन् विषये वदिष्यामि। वस्तुतः यस्मिन् शास्त्रे भवतः समस्याः सन्ति तस्मिन्नैव शास्त्रे पारङ्गताः द्वित्राः भवन्ति चेदेव ममापि सन्तोषः भवेत्।

जगन्नाथः - अन्तः प्रविशतु भवान् --- तत्पश्चात् चिन्तयामः।

(------------ सङ्गीतम् ---------- )

चतुर्थदृश्यम्

(एकस्मिन् प्रकोष्ठे द्वित्राः जनाः उपविष्टाः सन्ति। तत्रैव पण्डितराजेन सह अतिथिः प्रविशति।)

जगन्नाथः - प्रविशतु भवान्। इमे सन्ति शब्दशास्त्रस्य अध्येतारः।

एकः - भवतः परिचयः?

अतिथिः - मम परिचयं कथं वदाम्यहम्? नाम उक्त्वा किं प्रयोजनम्? तथा तु नाम्नः विस्मरणम् आवश्यकम्। भवतु। अहं कश्चित् यात्री अस्मि। अयं पण्डितराजः तदाप्रभृति मां विद्याध्ययनविषये पृच्छन्नस्ति।

द्वितीयः- महाश्चर्यम्। सः स्वयमेव शब्दप्रभुः भाषाप्रभुः च।

अतिथिः - हे पण्डितराज! भवान् आत्मानं शब्दप्रभुं मन्यते। सत्यमिदं यत् शब्देषु अधिराज्यं करोतीति। भवतः काव्यं मया पठितमस्ति। अद्भुतं शब्दरचनाकौशलम्। उदाहरणार्थम् - कदाचित् 'सिंहः' इत्यस्य प्रसिद्धशब्दस्य पर्यायवाचकः 'करिणामरिः' अथवा हिमालयस्य पर्यायवाचकः 'भवानीतातः' इति पदं भवता प्रयुक्तम्। इत्थं क्लिष्टरचनां कृत्वा भवता विद्वज्जनाः तोषिताः स्युः कदाचित्। परं तावता एव शब्दप्रभुत्वं न सिध्यति। वयं सर्वे शब्दशास्त्रस्य अध्येतारः स्मः। अधुना कथयतु कस्यापि एकस्य शब्दस्य अयमेव एकार्थः इति भवता वक्तुं शक्यते किम्?

द्वितीयः - तत्र काठिन्यं कुत्र वर्तते?

अतिथिः - अयं भ्रमः स्वविषये भवतः। एतस्मात् महदज्ञानं नास्ति।

जगन्नाथः - किमुच्यते भवता?

अतिथिः - चिन्तयन्तु। अस्माकं सर्वेषां जीवनं कियत् स्यात्? सप्तति-अशीतिवर्षात्मकमेव। अस्मिन् काले वयं शब्दान् ज्ञातवन्तः। परमयं शब्दः तु अनादि-अनन्तश्चास्ति। अस्यां त्रैलोक्यां अयं शब्दः वेदेषु, वेदान्ते, इतिहास-पुराणेषु तथा च शास्त्रेषु अनन्तकालात् भ्रमन्नस्ति। तदा यः शब्दः अनन्तः तस्य अयमेव विशिष्टार्थः इति वयं कथं वा वक्तुं शक्नुमः।

केवलं जनाः भवन्तं 'शब्दप्रभु' इति सम्बोधयन्ति तदर्थमेव खलु। कियत् धैर्यमिदम्? एवम् अनन्तकालस्य प्रवासे शब्दानां बहुविधम् अर्थपरिवर्तनं जातं स्यात्। शब्दस्य मूलाभिधार्थः, लक्ष्यार्थः व्यङ्ग्यार्थश्च इत्येतेऽपि अस्मिन् युगे अस्माकं कृते अनवगताः विद्यन्ते। तथापि स्वस्य कृते शब्दप्रभुः इति सम्बोधनं कथं यथार्थं भवेत्?

एकः - क्षन्तव्योऽहम्। परं शब्दः अर्थपूर्णः कथं भवति?

अतिथिः - शृण्वन्तु, भवन्तः सर्वे विद्वांसः सन्ति। तेन हि ईदृशप्रश्नस्य अपेक्षा भवद्भ्यः नैव युज्यते। यथा पार्वतीपरमेश्वरयोः शिवशक्त्योः च सम्बन्धः तथैव शब्दार्थयोः सम्बन्धः वर्तते। अयं नित्यसम्बन्धः विद्यते। यथा दुग्धं घृतेन व्याप्तं भवति तथा शब्दः अर्थेन। वर्णः अर्थश्च इत्येतौ परस्परगुम्फितौ। वर्णैः ध्वनिभिश्च स्फुट: पदस्फोटः अखण्डः, नित्यः चार्थवाचक एव भवति। 'स्फुटति अर्थः यस्मात् -' । एवमर्थबोधोऽपि। वर्णः, पदं तथा च वाक्यम् अर्थस्यैव विवर्तः।

जगन्नाथः -'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति वक्तुं शक्यं खलु।

अतिथिः- लौकिकार्थेन वक्तुं शक्यते। मया तु तत्त्वमुच्यते ननु। परा, पश्यन्ती, मध्यमा तथा वैखरी इत्यादीन् मार्गान् अतिक्रम्य वायोः आघातैः वर्णरूपेण अर्थ एव अभिव्यक्तः भवति।

अहो, श्रौतप्रत्यया अर्थवत्तां दातुम् उत्थिताः तरङ्गाः नाम शब्दाः। 'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहाः'।

भवतु, अयं दीर्घविषयः, शीघ्रं पूर्णतां न गच्छेत्। भविष्यत्काले आगमनं भवति चेत् अस्मिन्विषये चर्चयिष्यते।

जगन्नाथः-इतःपरं कदा पुनरागमनं भवेत्?

अतिथिः - अनेन मार्गेण षट्सु मासेषु कदाचित् आगमनं भवेदेव। एवमेव मध्याह्ने पुनः अहम् आगमिष्यामि। इदानीं गम्यते मया। नमस्काराः-।

जगन्नाथः - तिष्ठतु भवान् - अत्र आगच्छतु - अस्मिन् उपवेशनगृहे -।

अतिथिः - कुत्र आगच्छामि?

जगन्नाथः - अत्रैव उपवेशनगृहं वर्तते।

अतिथिः - भवतु।

जगन्नाथः - भवता यावत् स्वनामाभिधानं नोक्तम्।

अतिथिः - तदर्थम् अत्र आहूतः किम्? मम नामविषये कथनीयं चेत् शृणोतु। मम कतिचन निश्चितस्थानानि सन्ति यत्र अहं षट्सु मासेषु एकवारम् अवश्यं गच्छामि। ते जनाः मां षाण्मासिकातिथिः इति परिचिन्वन्ति। भवन्तः अपि तथैव स्मरन्तु। अहो, इदम् उपवेशनगृहम् अतीव सुन्दरं वर्तते।

जगन्नाथः - सन्मानचिह्नानि, सन्मानवस्तूनि तथा च पुरस्काराः अत्र विद्यन्ते। इदं सर्वं जगता मह्यं दत्तम्। इतः यत्किमपि भवता कृपया स्वीकर्तव्यम्। सः भवतः अधिकारः एव।

अतिथिः - किन्तु -।

जगन्नाथः-भवतः सभाजनार्थम् अवसरं कल्पयतु कृपया। आजीवनं विद्याव्रतमेव येन पाल्यते सः एवं भ्रमन्नस्ति। तस्य सत्कारोऽपि न भवेत् किम्? अस्मादृशैः तु केवलं राजप्रासादे धनार्जनार्थमेव विद्याप्राप्तिः कृता। परं भवता - । आस्यताम् अस्मिन् आसने।

अतिथिः - अहं तादृशं किमपि नेच्छामि। मया तु मध्याह्नकालः यापनीयः आसीत्। भवतः कारणात् स कालः सम्यक् अतीतः। यतः काव्यशास्त्रविनोदेन कालः गच्छति धीमताम्।

जगन्नाथः - एवं मा वदतु। क्षणं यावत् तिष्ठतु भवान्।

अतिथिः - भोः जगन्नाथपण्डित! इदं सर्वं मास्तु। एतादृशानि सन्मानवस्तूनि मयापि प्राप्तुं शक्यमासीत्। परं मम प्रारब्धे नास्ति तत्किमपि। तस्मात् तत्सर्वं व्यर्थं मत्कृते।

जगन्नाथः - केवलमिदं वस्त्रम् - ।

अतिथिः - नैव पण्डितराज, महती इच्छा अस्ति चेत् अस्मिन्नैव वस्त्रे यत् दातुमिच्छति तद्रव्यं बद्ध्वा अत्रैव स्थापयतु। षट्सु मासेषु एतस्मात् किमपि नाणकं पतितं चेत् मत्कृते योग्यं भवेत्। तदानीमहं तद् नेष्यामि। अस्तु। साधयाम्यहम्। नमस्काराः।

( ----- सङ्गीतम् ------ )

पञ्चमदृश्यम्

(गङ्गानदीतटपरिसरदृश्यम्)

जगन्नाथः - अधुना वदतु, किं भवतः नामधेयम्?

विद्याधरः - विद्याधरः।

जगन्नाथः - भोः विद्याधर, भवता एव कथनीयं यत् कः पण्डितराजः, अहम् उत सः षाण्मासिकः अतिथिः।

जीवने सर्वविधपुरस्काराः सन्मानाश्च मया लब्धाः। विद्वन्मान्यः अभवमहम्। कतिचन द्वेषिणः अपि सन्ति मम। कदाचित् लोकापवादैः हृदयमपि विच्छिन्नं जातम्। परम् एवं निःस्पृहता न कदापि माम् आलिङ्गितवती। जीवनान्ते न्यूनातिन्यूनं समाधानं प्राप्नुयामिति धिया पुण्यनदीशरणम्। चिरस्थायिनः समाधेः एव आकाङ्क्षा मे। मातुः कुक्षौ गङ्गामातुः सान्निध्ये च विश्रान्तिप्राप्त्यर्थं समुत्सुकोऽहम्। मन्ये, तस्याः स्वरूपवर्णनेन वाणी निश्चयेन सार्थकतामाप्नुयात्।

तस्मात् वदामि-

निधानं धर्माणां किमपि च विधानं नवमुदां
प्रधानं तीर्थानाममलपरिधानं त्रिजगतः।
समाधानं बुद्धेरथ खलु तिरोधानमधियां
श्रियामाधानं नः परिहरतु तापं तव वपुः॥

(श्लोककथनध्वनिः शनैः शनैः अश्रूयमाणः भवति। अपि गङ्गाप्रवाहध्वनिश्रवणं वर्धते।)

# भारतवर्षस्य इतिहासे ऋभुस्वरूपम्

-डॉ. लक्ष्मीकान्तविमलः

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन अगस्तमासस्य ३१तमे दिनांके सायंकाले ५ वादनतः ७ वादनपर्यन्तम् अन्तर्जालीयमाध्यमेन एका राष्ट्रिया संगोष्ठी समायोजिता। पण्डितमधुसूदनओझामहोदस्य इन्द्रविजयस्य द्वितीयाध्यायस्य विविधविषयं चाधारीकृत्य इयं राष्ट्रिया संगोष्ठी प्रवर्तिता ।

कानपुरनगरस्य श्रीविक्रमाजीत-सिंह-सनातन-धर्म-महाविद्यालयस्य संस्कृतविभागस्य आचार्याः प्रो. शोभामिश्रमहोदयाः मुख्यातिथिरूपेण कथितवत्यः यद् ऋभुविषये इन्द्रविजयग्रन्थे ऋग्वेदतः दीर्घतमसा कृतं कीर्तिसूक्तम्, वामदेवेन अपि ऋभुविषये वामदेवसूक्तं वर्णितम्। तत्र ऋभुः मनुष्यस्य कार्यसहायकः शिल्पी आसीत, मनुष्यत्वात् सः ऋभुः भारतवर्षस्य निवासी आसीत। ऋभुः अश्वद्वयस्य निमार्णं कृतवान्, तौ अश्वौ आरुह्य देवराजः इन्द्रः दस्यून् हतवान्। अनेन प्रमाणेन ऋभुः अत्र एव निवसति स्म। मनुष्यलोके सुधन्वा ऋभोः पिता आसीत्, अनेन प्रमाणेन ऋभुवर्गस्य आर्यस्य निवासस्थानं भारतवर्षम् आसीत् एव।




इत्थमृभूणामेषां शिल्पं शृणुमः पुरा मनुष्याणाम्।
भारतवर्षाभिजना ध्रुवमासंस्ते मनुष्यत्वात् ।।
एभिश्च निर्मितौ तावश्वौ हरिसंज्ञकौ समारुह्य।
इन्द्रो दस्यूनवधीत् तस्मादृभवः पुरैवासन् ।।

एष सुधन्वा राजा जनक ऋभूणां च मानुषे लोके।
आसीद् भारतवर्षे तस्मादार्याः पुराप्यासन् इन्द्रविजयः पृ. ३४३, कारिका१-३

दिल्लीविश्वविद्यालयस्य हिन्दूमहाविद्यालयस्य संस्कृतविभागस्य आचार्याः प्रो. अनीताराजपालमहोदयाः अकथयन् यद् ऋभुपरिचयक्रमे इन्द्रविजयग्रन्थे ऋभोः पिता सुधन्वा आसीत। ऋभोः गुरुः त्वष्टा आसीत। त्वष्टा ऋभुं शिल्पकर्मणि पूर्णं शिक्षितं कृतवान्। दस्युयुद्धं प्रसिद्धम् अस्ति इतिहासे, दस्युयुद्धतः पूर्वम् एव ऋभोः सन्दर्भः ऋग्वेदे दृश्यते।

दस्युनियुद्धादस्माद् बहुपूर्वं भारते वर्षे ।
आसीन्नृपः सुधन्वा पुत्रास्तस्य त्रयस्त्वासन् ६ इन्द्रविजयः पृ. ३२०, कारिका २

ऋभोः शिल्पत्रयम् आसीत। ते ऋभवः परोक्षस्य कृते पञ्च शिल्पानि, मित्रतायाः कृते दश शिल्पानि, यशःप्राप्त्यै अनेकानि शिल्पानि रचयामासुः।

अथ कुशला ऋभवस्ते त्रेधा शिल्पानि कल्पयामासुः।
पञ्च परोक्षार्थेऽपि च दश सख्यार्थे बहूनि कीर्त्यर्थे ।। इन्द्रविजयः पृ. ३२४, कारिका १

त्रिपुरा-विश्वविद्यालयस्य संस्कृतविभागस्य सहायकाः आचार्याः डॉ. जयासाह-महोदयाः अकथयन् यद् इन्द्रविजयग्रन्थस्य भारतवर्षाख्यानमध्ये नदीनां बहूनि नामानि वर्णितानि सन्ति। न केवलं नदीनां नामानि सन्ति अपितु नदीतटस्थ- स्थानस्यापि भौगोलिकी रूपरेखा वर्णिता विद्यते। ऋग्वेदे पूर्वसप्तनदस्य नामानि सन्ति यथा- गङ्गा, यमुना, सरस्वती, शुतुद्रीः, परुष्णिः असक्नी, वितस्ता।

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयाऽर्जीकीये शृणुह्या सुषोमया। ऋग्वेदः १०.७५.५

पश्चिमसप्तनदस्य नामानि सन्ति। यथा- हे सिन्धो ! गमनशीलायाः गोमत्याः नद्याः संमेलनाया तुष्टामानद्या सह गतवती। पुनः सुसर्तुः रसा श्वेती, कुभा. मेहन्ती इत्यादिनद्या सह संमिल्लन्ति स्म, पुनः सर्वाभिः सह मिलित्वा रथेन गच्छति स्म।

तृष्टा मया प्रथमं यातवे सजूः सु सर्त्वा रसया श्वेत्या त्या ।
त्वं सिन्धो कुभया गोमती क्रुमुं मेहत्न्वा सरथं याभिरीयसे ।। ऋग्वेदः १०.७५.६

उत्तरसप्तनदस्य नामानि सन्ति। पञ्चगौरदेशात् उत्तरदिशां प्रति अन्यः एकः सप्तनदः विद्यते। यस्य नामानि कुलिशी, वीरपत्नी, शिफांजसी इत्यादयः सन्ति।

तत्पञ्चगौरदेशादुत्तरतोऽन्योऽस्ति सप्त नददेशः ।
कुलिशी च वीरपत्नी शिफाञ्जसीत्यादिभिः क्लृप्तः।। इन्द्रविजयः पृ. ३१०, कारिका १

जोधपुरनगरस्य राजकीयमहाविद्यालयस्य संस्कृतविभागस्य सहायकाः आचार्याः डॉ. दीपमालामहोदयाः अकथयन् यत् दासो द्विविधः अस्ति। मनुष्यदासः अमनुष्यदासश्च। दासः न देवः, न दानवः, न ही मनुष्यः आसीत्। आर्यैः सह तस्य विद्वेषः आसीत्, कश्चित् आनार्यविशेषः आसीत्।

स एष दासस्तु न देव आसीन्न दानवो नापि मनुष्य आसीत्।
आर्यैर्द्विषन् कश्चिदनार्यः पृथग्वदेवैष विभाग आसीत्।। इन्द्रविजयः पृ. ३०३, कारिका १

जवाहरलाल-नेहरू-विश्वविद्यालयस्य संस्कृत-एवं-प्राच्यविद्या-अध्ययन-संस्थानस्य आचार्याः प्रो. सन्तोषकुमारशुक्लवर्याः कार्यक्रमस्य अध्यक्षाः आसन्। तेन कथितं यत् आर्याणां कीदृशः स्वभावः आसीत्, इत्यस्य कृते ग्रन्थकारः पण्डित-ओझावर्यः लिखति स्म। यस्य आराध्यः ओङ्कारः, यस्य शास्त्रं वेदः अस्ति, यस्य गङ्गा गौश्च आराध्या अस्ति, स एव आर्यः। स एव भारतवर्षस्य मूलनिवासी अस्ति। स न कदापि बहिर्भागतः आगतः।

ओङ्कार एष येषामविशेषान्मन्त्र आराध्यः।
येषां भिन्नमतानामप्यत्रास्त्येकबन्धुत्वम् ।।
येषां शास्त्रं वेदश्चातुर्वर्ण्ये विभाजितो धर्मः।
धेनुर्गङ्गाऽऽराध्या तेषां देशोऽस्ति भारतं वर्षम् ।। इन्द्रविजयः पृ. २५८, कारिका १

श्रीलाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य अतिथिप्रध्यापकाः डॉ. मधुसूदनशर्ममहोदयाः सस्वरं वैदिकमङ्गलाचरणं कृतवन्तः। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान् । अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

# श्रीगुरुरामरायसंस्कृतमहाविद्यालयदेहरादून द्वारा विशालशोभायात्रा संस्कृतसप्ताहसम्पूर्तिः

देहरादूनम्। प्रतिवर्षमिव सामान्यजनमानसे जनजागृतिहेतवे संस्कृतसप्ताहस्य अन्तर्गतानां प्रदेशे समाचरितसंस्कृतकार्यक्रमाणां सम्पूर्तौ देहरादूनमहानगरे श्रीगुरुरामरायलक्ष्मणसंस्कृतमहाविद्यालयस्य परतया देहरादूनस्य महापौरः श्रीसुनील उनियालगामाः, प्रख्यातकथावाचकः आचार्यः सुभाषजोशी, यात्रायाः पुरोधा लक्ष्मणसंस्कृतविद्यालयस्य प्राचार्यः डॉ रामभूषणबिजल्वाणः, श्रीशिवनाथसंस्कृतविद्यालयस्य प्राचार्यः डॉ. रामप्रसादथपलियालः, उत्तराखण्डविद्वतसभायाः अध्यक्षः विजेंद्रममगाई, उत्तराखण्डपुरोहितसमाजस्य अध्यक्षः प्रेमबिञ्जोला, संस्कृतच्छात्रसेवासमितेः अध्यक्षः शिवम्अवस्थी ,



संस्कृतभारतीउत्तराञ्चलप्रान्तस्यसङ्घटनमन्त्री गौरवशास्त्री, यमकेश्वरस्य पूर्वजिलापञ्चायतः आरतीगौडः, जनपदमन्त्री प्रदीपसेमवालः इत्येषां गणमान्यानां परमसहयोगेन समाहारेण च दिव्या भव्या अदृष्टपूर्वा संस्कृतशोभायात्रा सम्पन्ना। तत्र विशेषेण विद्यालयप्रबंधकसमितेः चन्द्रमोहनसिंहपय्यारी यात्रा संयोजकः आचार्यमनोजशर्मा, सहसंयोजकः आचार्यनवीनभट्टः , आचार्यआशाराममैठाणी इत्येषां कुशलसंयोजनेन सम्पन्ना। ततश्च अन्येषां गणमान्यानां सहभागितया एम के पीमहाविद्यालयात् मीनाक्षीगार्डनपर्यन्तम् इयं शोभा विरमिता। सम्पूर्तिसत्रे 108 महन्तकृष्णागिरीमहाराजः संस्कृतं पठितुकामं छात्रवर्गं सम्प्रेरयितुं परामृष्टवान्। संस्कृतभारतीउत्तराञ्चलप्रान्तस्य सङ्गटनमन्त्री गौरवशास्त्री संस्कृतम् आदर्शजीवनहेतवे प्रत्यपादयत्।

यात्रायाः अस्याः पुरोधा डॉ राम भूषणबिजल्वाणः सर्वेभ्यः सहयोगिसंस्थाभ्यः समागतेभ्यो धन्यवादं ज्ञापितवान्। अमुष्मिन् अवसरे विशेषेण डॉ सीमाबिजल्वाण, डॉ मनीषाभण्डारी, आरतीरतूडी, दीपशिखा, डा शैलेंद्रडङ्गवालः, डॉ मीनाक्षीकोठारी, संस्कृतभारतीतः डॉ प्रदीपसेमवालः, डॉआनन्दजोशी, धीरजमैठाणी, पुरोहितसमाजपरतया संरक्षकः कलशानन्दसेमवालः, विनोदकोठारी, मितानंदनौटियाल, सुभाषडिमरी, हर्षपतिगोदियाल, गोपालकाला, अमितकाला, लक्ष्मीममगाई , रामः, कृष्णबगवालः, तोतारामः , मनोजः, सुनीलः विद्वत्सभातः भगवतीप्रसादथपलियालः, सुरेन्द्रबलूनी, राधाकृष्णवैदिकः इत्येतान् समेत्य राजकीयबालिकाविद्यालयराजपुरमार्गः, सरस्वतीविद्यामन्दिरम्, सुमननगरम्, द्रोणस्थलीआर्ष कन्यागुरुकुलं, राजपुरमार्गः, सविशेषं श्रीगुरुरामरायलक्ष्मणसंस्कृत महाविद्यालयः , श्रीशिवनाथ संस्कृतमहाविद्यालयः प्रीतममार्गः, एम.के.पी. उच्चतरमाध्यमिकविद्यालयः, राजकीयबालिकाउच्चतरमाध्यमिकविद्यालयः अजबपुरं , सनातनधर्म- उच्चतरमाध्यमिक- विद्यालयः बन्नू, डी.डी.महाविद्यालयः नीम्बूवाला, गुरुनानकमहिला उच्चतर-माध्यमिक-विद्यालयः रेसकोर्स इत्येषां सहयोगि-विद्यालयानां एन.सी.सी./ छात्रच्छात्राः तत्र सम्मिलिताः। अथ च विशिष्टायां दिव्यभव्यायां संस्कृतस्य गौरवपरिचायिकायां, द्रोणनगरीदेहरादूने संस्कृतस्य वैभवप्रदर्शिकायां, संस्कृताभिमानिनां स्वाभिमानस्य संवर्धिकायां, संस्कृतप्रचारिकायां प्रसारिकायां अजातपूर्वस्यां विशालसंस्कृतशोभायात्रायां नैके विद्वज्जनाः सामाजिकाः संस्कृतानुरागिणः समुपस्थिताः आसन्।

जय देवभूमे! जय देववाणि!

प्रथमपुटस्य शेषभागः

# केन्द्रीयसंस्कृतविश्वविद्यालस्य...

गीताकण्ठपाठ-सुभाषितकण्ठपाठादयः नैकाः प्रतियोगिताः अभूवन्। इमाः सर्वाः अपि प्रतियोगिताः कनिष्ठवरिष्ठछात्राणां मध्ये आसन्। सप्तदशाऽष्टादशदिनाङ्कयोः परिसरीयछात्राणां मध्ये क्रमशः गीतापाठप्रतियोगिता वेदपाठप्रतियोगिता चाऽभवताम्। एको न विंशतिदिनाङ्के महोत्सवस्याङ्गत्वेन परिसरीयैः आचार्यैः साकं छात्रैः श्रावणी-उपाकर्मणः समायोजनं प्रो. भारतभूषणमिश्रमाहाभागानां निर्देशकत्वे जातम्। विंशति दिनाङ्के प्रातः नव वादनतः शास्त्रीयप्रतियोगितानामनुष्ठानमभवत्। शास्त्रीयप्रतियोगितान्तरगते परिसरीयाः शास्त्रिप्रथमकक्षातः आरभ्य आचार्यकक्षां यावत् सर्वविभागीयाः छात्राः अधीतस्वस्वविषयमादाय सम्यक् विषयस्योपस्थापनं कृतवन्तः। तस्मिन्नेव दिनाङ्के एकादशवादनतः संस्कृतसप्ताहमहोत्सवस्य समापनसत्रस्याऽनुष्ठानं प्रारब्धम् परिसरेण। समापनसत्रे प्रो. राधावल्लभत्रिपाठी (कुलपतिचरः राष्ट्रियसंस्कृतविश्वविद्यालयः नई दिल्ली) प्रो. वैद्यनाथ लाभ,श्री ऋषिकुमारशुक्ला, प्रो. उर्मिला शुक्ला, (प्राचार्या भोपालस्थस्य पं खुशीराम आयुर्वेदमहाविद्यालस्य) डॉ हेमचन्द्र पाण्डेयः, डॉ अच्छेलाल, (विभागाऽध्यक्षः वरकत उल्ला विश्वविद्यः भोपालम्) डॉ प्रभाकरपाण्डेयः, डॉ परमानन्दमिश्रः, डॉ ओमप्रकाशराजपाली, डॉ भरतव्यास, (पी. ए. उच्चशीक्षामन्त्री मध्यप्रदेशसर्वकारस्य) श्री उमाशङ्कर नागाइच, डॉ लक्ष्मी नारायणपाण्डेयः, डॉ निलिम्पत्रिपाठी, प्रो. कमला पाण्डेया, इत्यादीनामाचार्याणां विशिष्टसम्माननं जातम। एवमेव प्रतिवर्षमिव षण्णां विदुषां संस्कृतभूषणेन सम्माननेन सम्माननं कृतम् परिसरनिदेशकैः। संस्कृतभूषणसम्माननेन सम्माननं येषां विदुषां जातम् ते सन्तिख्रडॉ उपेन्द्रभार्गवः (सहायकाचार्यः पहर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यलस्य) डॉ पङ्कजकुमार जैनः, डॉ राहुल शर्मा, डॉ रजिनी वी. जी.,डॉ अनिलकुमारः, श्री प्रतापः, इति। जातासु प्रतियोगितासु यैः छात्रैः पिरथम-द्वितीय-तृतीयपुरस्काराः लब्धाः तेषामपि सम्माननमभवत। सहैव परिसरे निखिलप्राध्यापकानां कर्मचारिणाञ्च अवसरेऽसमिन् सम्माननं जातम्।

उद्घाटनसत्रे मुख्यातिथिभिः प्रो. गोस्वामिवर्यैः स्वीद्बोधने उद्बोधितं यत् सनातनधर्मरक्षणाय संस्कृतस्याऽध्ययनमावश्यकम। संस्कृताऽध्ययनमन्तरा तद्भाषयालिखितशास्त्रेषु विहिततत्त्वानां ज्ञानाऽभावे सनातनधर्मस्य रक्षा कदापि न भवितुमर्हतीति तैः सिद्धान्तितम्। एवमेव सारस्वतातिथिभिः विशिष्टाऽतिथिभिश्चसिद्धान्तितं यत् भाषा तथैव साधनमस्ति यथा प्रासादारोहणे सोपानानि। सोपानैर्विना न यथा प्रासादप्राप्ति तथा भाषया विना तद्भाषयालिखितग्रन्थप्रतिपादितसिद्धान्तप्राप्तिः। क्रमेऽस्मिन् सत्राऽध्यक्षैः परिसरनिदशकैः प्रो. रमाकान्तपाण्डेयैः निगदितं यत् संस्कृभाषायां लिखितग्रन्थप्रतिपादितसिद्धान्तानां साधिका संस्कृतभाषा अपितु आधुनिकज्ञानविज्ञानसाधिकाऽपि संस्कृतभाषा वर्तते। उद्घाटनसत्रस्य सञ्चालनम्, प्रो. प्रदीपकुमारपाण्डेयैः कृतम्। समापनसत्रस्य च सञ्चालनं डॉ रागिनीशर्म महोदयया कृतम्। निखिलकार्यक्रमाणां प्रस्ताविकं प्रस्तुतम्, डॉ दातारामपाठकेन।

# संस्कृतसप्ताह-प्रतिवेदनम्

-डॉ0 निरञ्जनमिश्रः

हरिद्वार। श्रीभगवानदास-आदर्श-संस्कृतमहाविद्यालये केन्द्रियसंस्कृतविश्वविद्यालयस्य निर्देशानुसारम् अगस्तमासस्य षोडश(16)तालिकातः आरभ्य त्रयोविंशति(23)तालिकां यावत् संस्कृतसप्ताहस्यायोजनं भव्यरूपेणाभवत्। निर्देशानुरं विविधविद्यालयैस्सह सम्पर्कं विधाय सहयोगत्वेनापि कार्यक्रमस्यायोजनमभवत्। अस्य सम्पूर्णवृत्तमधोलिखितमस्ति। 16/8/24 अद्य संस्कृतसप्ताहस्यारम्भोऽभवत्। सप्ताहस्यास्योद्देश्यमभिलक्ष्य भारतीयसंस्कृतिपरिज्ञानपुरस्सरं व्यावहारिकरूपेण तद्बोधनस्यावश्यकतां हृदि निधायोद्घटनावसरे माननीयाध्यक्षरूपेण डॉ0 भोला झामहोदयाः (प्राचार्यचराः अस्यैव महाविद्यालयस्य) आहूताः। एते महान्तो वैयाकरणाः विविधशास्त्रनिष्णाताश्च प्रतिष्ठितसामाजिकास्सन्ति। मुख्यातिथिरूपेण डॉ0 शैलेश कुमारतिवारी(उ.सं.वि.विद्यालयस्य वेदवेदांगसंकायाध्यक्षाः) आहूताः। एते विविधशास्त्रव्याख्यानपटवः कर्मनिष्ठाः युवानः सरलहृदयाः कवयश्च सन्ति। सञ्चालकरूपेण डॉ0 दीपककोठारी सप्ताहस्यास्योद्देश्यं आरम्भसमयादीनां सम्यगवबोधनं कृतवान्। स्वागतसम्मानादिसामान्याचारानन्तरं तिवारीमहोदयैः व्यावहारिकनिर्देशनपुरस्सरं संस्कृतस्य




महत्वं प्रतिपादितवान्। संस्कृतं विना सफलजीवनस्य कल्पनापि कर्तुं नैव शक्यते। संस्कारं विना चरित्रं न भवति चरित्रं विना जीवनं सफलं न भवति। संस्कारपरिज्ञानं संस्कृतं विना न भवितुमर्हति। चरित्रहीनसमाजस्य कदापि सौख्यं न भवितुमर्हति। अतस्सर्वतोभावेन सर्वैस्संस्कृतस्याध्ययनं विधेयम्। तत्र भेदभावमपहाय पारस्परिकसम्बन्धबन्धनं पोषणं रक्षणं भरणादिकमावश्यकमस्ति सामाजिकजीवने। अतः एकस्यैव संस्कृतस्याध्यनेन मानवजीवनसाफल्यं भवितुमर्हति। डॉ0 झामहोदयः छात्रान् प्राध्यापकान् च सम्बोधयन् संस्कृतस्य वैशिष्ट्यमादाय यदुक्तं तन्नूनमेव श्लाघ्यमनुकरणीयञ्च। पठनस्य ज्ञानस्योद्देश्यं किमस्तीति ज्ञानं प्रथमतयावश्यकम्। उद्देश्यपरिज्ञानं विना कदापि जीवनसाफल्यं न भवितुमर्हति। 'चरित्रेण नाशेन सर्वं नष्टं भवति।' इदानीं चारित्रिकविकासाभावादेव सामाजिकवैषम्यदर्शनं भवति। चरित्रहीना एवाधमा भवन्ति। ये कुत्सितकर्मणिप्रवृत्ता स्वात्मतोषाय लग्ना भवन्ति। यदि चरित्ररक्षणं स्यात् तदा नूनमेव समाजस्य कल्याणं स्यात्। केवलं चरित्रविकासार्थं तद्रक्षणार्थमेव वा संस्कृतस्योपयोगिता नास्ति। परन्तु सर्वत्र चरित्रस्य प्राधान्यमवश्यमस्ति। चरित्रं विना शिक्षा व्यर्थतामेवोपयाति। संस्कृतेन भौतिकविलाससाधनं न भवितुमर्हतीति कथनं कदाप्यौचित्यं नावहति। सर्वविधज्ञानोपायभूतसंस्कृतं सर्वदा शिक्षणीयमिति। सर्वकारपक्षतः संस्कृतसप्ताहस्य यदायोजनं भवति तल्लक्ष्य मानवतांसवर्धनमेवास्ति। अयमवसरो वर्ततेऽस्माकं स्वचारित्रिकविकासस्य। अवसरस्यास्य लाभो ग्राह्यः। कार्यक्रमेऽस्मिन् समेऽपि प्राध्यापकाः छात्राश्चोपस्थिता लाभं गृहीतवन्तः। सस्कृतस्य वास्तविकतां च ज्ञातवन्तः। दिनांक 17/8/24 अद्य हरिद्वारस्थऋषिकुलविद्यापीठेन सह मिलित्वा कार्यक्रमस्यायोजनमभवत्। अस्य कार्यक्रमस्योद्देश्यमासीत् छात्राणां परस्परं व्यावहारिकपरिज्ञानस्य भावपरिचयस्य चिन्तनादानप्रदानस्य।

तत्रात्याचार्यो डॉ0 बलदेवप्रसादचमोला महोदयाः, डॉ0 नवीनपन्तमहोदयाः भास्करमहोदयाः अन्ये च आचार्याः सोत्साहं कार्यक्रमस्यास्यायोजनं कृतवन्तः। तत्र लघु लघु ब्रह्मचारिणां मुखात् श्लोकोच्चरणं सुमधुरमासीत्। तत्र श्लोभ्यासेन सह संस्कृतगीताभ्यासस्यापि निर्देशो विहितः। इत आरभ्य छात्राः परस्परं मिलित्वा समये समये स्वशास्त्रैस्सह संस्कृतगीतस्य श्लोकगानस्य चाभ्यासं करिष्यन्तीत्याशासे।

सम्मिलितकार्यक्रमस्यायोजनं ब्रह्मचारिणां कृतेऽपि नवीनमेव किमपि प्रस्तौति स्म। नवीनतां वीक्ष्य समेषां मनो मोदते। तज्जीवनेन परिचिता महाविद्यालयस्यापि च्छात्राः मुदिता अभवन्।

दिनांक 19/8/24-अद्य श्रावणमासस्य पूर्णिमा वर्तते। श्रावणी उपाकर्म भवत्यद्य। अयमेको विशिष्टः संस्कारो भवति। अस्माकं युवकानां कृते संस्कारस्य व्यासवहारिकज्ञानमावश्यकमस्ति। इति धिया पूर्वनियोजितकार्यक्रमानुसारं छात्राः आहूताः प्रेमनगरघट्टे गंगातटे। यत्र हरिद्वारस्य विशिष्टाः विद्वांसो पण्डिताः श्रावणी उपाकर्म कुर्वन्ति। तत्र छात्राः प्रथमं तावत् तत्कर्मायोजनं दृष्टवन्तः। तदनन्तरं डॉ0दीपककोठारी डॉ0 आलोकसेमवाल इत्यनयोः समेवतप्रयासेन छात्राः स्वयं तत्कर्मसम्पादनं कृतवन्तः। तत्र प्रतिपदं तत्कर्मबोधनमप्यभवत्। एतादृशेन कार्येण नूनमेव संस्कारवृद्धिः स्यात् यूनां चेतसि। सुसंस्कृतयुवका एव भारतस्य भविष्यं निर्धारयिष्यन्ति। अतः एतादृशस्य प्रयोगस्य पौनः पुण्येनावश्यकता वर्तते।

दिनांक 20/8/24-अद्य गोविन्दपुरीस्थ श्रीसांई इन्स्टीच्यूट (योगमहाविद्यालये) श्रीभगवानदाससंस्कृतमहाविद्यालयस्य तनमहाविद्यालयस्य च सम्मिलितरूपेण कार्यक्रमस्यायोजनमभवत्। तत्रत्याः प्रधानाचार्याः तथा च समे प्राध्यापका उपस्थिता अभवन्। योगविभागस्य छात्राणामप्युपस्थितिः श्लाघ्या आसीत्। योगशास्त्रस्य व्यावहारिकप्रदर्शनं तत्रत्यछात्रैः प्रदर्शितम्। शिवस्तुतिव्याजेन विविधविध योगागसनस्य प्रदर्शनं वस्तुतः श्लाघ्यमासीत्। गीतनृत्यादीनामपि कार्यक्रमोऽभवत्। परन्तु तेषां योगशास्त्रस्य वास्तविकतत्त्वनिदर्शनमावश्यकमिति मत्वा श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयस्य वरिष्ठाचार्याः साप्ताहिककार्यक्रमस्यास्य संयोजकाः डॉ0 निरञ्जनमिश्रमहोदयाः सम्यक् तत्वबोधनं कृतवन्तः। तद्ज्ञानेन कथं व्यावहारिकजीवने सौलभ्यं भवितुमर्हतीत्यपि बोधितवन्तः। तच्छुत्वा तद्ज्ञात्वा च छात्रा नवीनतत्वावलोकनमिव कृतवन्तः। ते ज्ञातवन्तो यत् शास्त्रस्य व्यावहारिकप्रयोगेन भवति जीवनस्य साफल्यं न केवलं पंक्तिरटनेन।

विशिष्टातिथिः श्रीमन्तो वैजापुरकरजीमहोदयाः स्वकवितापाठेन सह मावजीवनस्योद्देश्यबोधनं कृतवन्तः। संस्कृतभारतीसंस्थायाः प्रान्तप्रमुखः श्रीगौरवजीमहोदयाः संस्कृतस्य महत्वं बोधितवन्तः। संस्कृतशिक्षणस्योपायं च बोधितवन्तः। संस्कृतभाषणशिक्षणाय समेषां चावाहनं कृतवन्तः।

दिनांकः 21-22/08/24- उभयोर्दिवसयोर्महाविद्यालये छात्राणां कौशलप्रदर्शनस्य कार्यक्रमः आयोजितः। कार्यक्रमेऽस्मिन् डॉ0 दीपक कोठारी डॉ0 आदित्यः, डॉ0 ज्ञानसिन्धुश्च सूत्रधारस्य भूमिकामूढवन्तः। अन्ये चाचार्याः सम्यक् सहयोगं विधाय कार्यक्रमं सफलीकृतवन्तः। तत्र संस्कृतशास्त्रीयभाषणं, शास्त्रार्थविधिः, संस्कृतसमूहगानम्, संस्कृतश्लोकोच्चारणम्, एकलगानम्, छन्दोनिर्माणम्, यथामति स्वविचारप्रकटनं संस्कृतभाषामाध्येन, इत्यादीनां कार्यक्रमाणामायोजनमभवत्। कार्यक्रमेऽस्मिन् छात्राणामुत्साहो दर्शनीय आसीत्। एवमेव व्यावहारिकप्रदर्शनेन छात्राणां चेतसि शास्त्ररुचिर्जागरिता भविष्यतीति मन्ये। अहमपि किमपि करिष्यामीति भाव एव तान् प्रेरयति। आत्मप्रेरणयैव कार्यस्य साफल्यं भवतीति निश्चितम्। एतादृशस्य कार्यक्रमस्य पौनःपुण्येनावश्यकता प्रतीयते।

दिनांकः 23/8/24-अद्य सप्ताहस्यास्य समापनकार्यक्रमः अभवत्। अद्य विशेषरूपेण काव्यगोष्ठी परिकल्पिताऽऽसीत्। तत्र सभाध्यक्षरूपेण डॉ0 भोलाझाा महोदया आमन्त्रिता आसन्। मुख्यातिथिरूपेण गरीबदासीयाश्रमस्याध्यक्षः युवसंन्यासी श्री रविदेवमहोदयः आसीत्। कविरूपेण आमन्त्रिता आसन् डॉ0 लक्ष्मीनारायणपाण्डेयः(भोपालतः) डॉ0 अरविन्दतिवारी (वागपततः) डॉ0 राहुलपोखरियालः (देवघर,झारखण्डतः) एते त्रयः ऑनलाईनमाध्यमेनोपस्थिता स्वकाव्यं श्रावितवन्तः। डॉ0 शैलेश कुमारतिवारी (उ.सं.वि.वि. हरिद्वारतः)डॉ0 सर्वेशति तिवारी डॉ0 निरञ्जनमिश्रः, डॉ0 वी.के.सिंहदेवः(महाविद्यालयादेव)एते मञ्चे उपस्थिता आसन्। एतदतिरिच्य कतिचन युवकवयोऽपि नवोदितप्रतिभारूपेणोपस्थिता आसन्। यथा दीपकपाण्डेयः (आचार्य2सेमे0) नवीनकाडपाल(उ.सं.वि.वि. हरिद्वार वी.एडविभागतः) अमित जोशी (उ.सं.वि.वि. हरिद्वार वी.एडविभागत तः)नरेशप्रसाद (उ.सं.वि.वि. हरिद्वार वी.एडविभागत तः) डॉ0 लक्ष्मीनारायणपाण्डेयमहोदयस्य गलज्जलिका 'मन्दमन्दं' कर्णप्रियं रसप्रवाहकं सुमधुरमासीत्। डॉ0 अरविन्दतिवारी कलकत्तानगरस्य दुर्दान्तघटनां स्मारयन्तीं रचनां प्रस्तुतवान्। डॉ. राहुल पोखरियालः संस्कृतकजरीगीतं श्रावितवान्। डॉ. सर्वेशतिवारी भारतस्य गौरवगाथां श्रावितवान् कवितामाध्यमेन। सुमधुरकण्ठो डॉ0 शैलेशकुमारतिवारी देशभक्तिगीतं कजरीगानं, शिवभजनञ्च श्रावितवान्। डॉ0 सिंहदेवमहोदयः दुर्जनलक्षणादिकं काव्यमाध्यमेन व्याख्यातवान्। डॉ. मिश्रः करालकालमालोचयन् देशस्य वर्तमानकालिकदानवरचितदुर्विपाकस्य स्थितिं गीतमाध्यमेन श्रावितवान्। नवोदिताः युवानः विविधच्छन्दसा सरसा पदावल्यां स्वभावाभिव्यक्तिं कृतवन्तः। तत्कवित्वप्रतिभा वस्तुतः श्लाघ्या दृष्टा। मुख्यातिथिः रविदेवजीमहोदयः महाविद्यालयस्य कार्यक्रमं वीक्ष्य मनसा प्रसन्नः महाविद्यालयस्यास्य गौरवगाथां प्रस्तुतववान्। सहैव स्पष्टमुक्तवान् यत् महाविद्यालयस्यास्य यशः प्रतिदिनं वर्धते इत्यस्माकं गौरवस्य विषयो वर्तते। छात्राणं प्रतिभा वस्तुतः श्लाघ्यानुकरणीया चास्ति। सवमेव सर्वेषु विद्यालयेषु भवदिति कामये। सभाध्यक्षः डॉ0 झामहोदयः स्वसम्बोधने नवोदितकवीनां प्रतिभाप्रशंसनं कृतवान् भूरिशः। प्राध्यापकानामपि धन्यवादं ज्ञापितवान् येषां प्रयासेनैतादृशी प्रतिभा जनसम्मुखं वर्तते। विशिष्टानां कवीनां तु चर्चैव का। येषां मुखान्निर्गच्छन्तीमविरलप्रवहमानां सरसां कवितां निशम्य पूर्णोदरोऽपि बुभुक्षित एवास्मि। छात्राणामुत्साहवर्धनाय विविधविषयमुपस्थापितवान्। डॉ0 ज्ञानसिन्धुः समुपस्थितानां विदुषामतिथीनां कवीनाञ्च धन्यवादं ज्ञापितवान्। विशेषतो केन्द्रियसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याणां प्रो0वरखेडीमहोदयानामथ च महाविद्यालयस्यास्य प्रबन्धसमितेः अध्यक्षवर्याणां श्रीबिहारीलालशर्ममहोदयानां सश्रद्धं धन्यवादज्ञापनं येषां सन्निर्देशेनैतादृशस्य कार्यक्रमस्यायोजनं भवति सफलतां च याति।

शान्तिपाठेन सभेयं विरामं गता।

## सुवर्णपिच्छम्

**जरातीकथाकर्जी-कालिन्दी-वसन्तभाई-परीख**

**अनुसर्जकः मधुसूदनव्यासः**

गुर्जरप्रदेशे गीर-नामके अरण्ये मोरसरः नाम ग्रामः वर्तते। बहुवर्षेभ्यः पूर्वं तत्र श्धनजीश्-नामा कश्चन कृषीवलः वसति स्म। तस्य भार्याऽपि सुशीला, त्रयः पुत्राः अपि आज्ञाकारिणः भवन्ति स्म। ते सर्वे कृषिकार्येण प्राप्तेन धनेन सन्तुष्टाः। सः कृषकः अन्नवस्त्रादिभिः परिवारस्य साधुनिर्वाहं करोति स्म।

किन्तु वर्षद्वयं यावत् दुर्भिक्षम् आपतितम्। अतः कृषिकार्यं स्तम्भितम् एव। तस्य वृत्तिः समाप्ता। सः कदाचित् कार्यं प्राप्नोति कदाचित् न प्राप्नोति । तेन अभावचिन्ताग्रस्ता तस्य पत्नी रुग्णा सञ्जाता। गृहेऽपि अन्नम् न्यूनीभूतम। एवम् एव वस्त्राभावः अपि सञ्जातः। तस्य आवासः अपि जीर्णतां गतः। अतीव दारिद्र्यपीडितः धनजी खिन्नः अभवत्।

एकदा स स्वजीर्णगृहस्य बर्हिभागे उपविष्टः आसीत्। तदा कोऽपि मयूरः तत्र आगतः। स मनुष्यवाचा अकथयत्, 'वदतु मे भ्रातः ! कथम् इत्थं खिन्नः उपविष्टोऽसि।' मनुष्यवाचा मयूरस्य संवादः एव धनजी-कृते विस्मयकरः अभवत्। तस्य मनसि कुतूहलं जातम्। स्वकर्णयोः अविश्वस्ते तस्मिन् मयूरः पुनरेकवारम् अवोचत्, "कथय कथय मां तव खिन्नतायाः कारणम्। अहं तव सहायो भविष्यामि।"

अथ धनजी-वर्येण सर्वं कथितम्।

मयूरेण धनजीवृत्तं श्रुत्वा कथितम्, "अहं तुभ्यं प्रतिदिनं पिच्छम् एकम् दास्यामि। तत् पिच्छं हस्ते निधाय भवद्भिः मन्त्रः एक उच्चारणीयः।" धनजी अकथयत्, "कः मन्त्रः उच्चारणीयः?"

मयूरेण भाषितम्-

मयूरपिच्छ मयूरपिच्छ

त्वं तु भव सुवर्णपिच्छम्।

अयं मन्त्रः त्रिः उच्चारणीयः। ततः तत् पिच्छम् सुवर्णपिच्छं भविष्यति। मयूरस्य वाणीं श्रुत्वा धनजीवर्यस्य मुखे काचित् आशा प्रकटिता। तेन सत्वरं मयूरस्य कथनं स्वीकृतम्।

ततः प्रतिदिनं तस्य निवासस्थानं मयूरः आगच्छति स्म। एवमेव तस्मै एकम् एकं पिच्छम् दत्वा निर्गच्छति स्म। धनजी अपि प्रतिदिनं मन्त्रोच्चारणं करोति स्म।

अथ मयूरपिच्छं सुवर्णमयं भवति स्म। अतः घनजी अतीव प्रसन्नो भूत्वा सपरिवारम् आनन्देन दिनानि यापयति । स तु सुवर्णपिच्छम् गृहीत्वा सुवर्णकाराय आपणिकाय अयच्छत्। सुवर्णकारेणापि तस्मै बहूनि रूप्यकाणि दतानि। एतस्मात् धनात् तेन स्वभार्यायै औषधानि फलानि च क्रीतानि। बालकानां कृते मिष्टान्नानि वस्त्राणि च गृहीतानि। तत्पश्चात् तस्य गृहे धान्यभाण्डागाराः अपि पूरिताः। नूतनानि पात्राणि च अन्यानि गृहोपकरणानि च आगतानि। एतैः तस्य गृहं सुसमृद्धं सञ्जातम्। अथ धनजीवर्येण स्वगृहमपि विशालम् कृतम्। एवं स समृद्धोऽभवत्।

परन्तु प्रकृत्या धनजी सन्तोषपरायणः जीवः आसीत्। श्रमजीवी अपि आसीत्। तेन विचारितं यत् विना कार्यम् उपार्जनं न योग्यम्। अतः किश्चित् करणीयम् । अतः तेन क्षेत्रं स्वीकृत्य तस्मिन् क्षेत्रे कृषिकार्यम् आरब्धम्। तत्र भूयान् श्रमः कृतः, वृष्टिरपि तदा सुष्ठ जाता। अतः कालक्रमेण धान्यपुष्टं स्वक्षेत्रं दृष्ट्वा सः आनन्दपरायणः सञ्जातः ।

अन्ते धनजी मयूरम् अकथयत् यत् सम्प्रति मा आगच्छ पिच्छदानाय। येभ्यः तस्य आवश्यकता वर्तते तेभ्यो दीयताम् इति। अधुना तव पिच्छदानेनाहं समृद्धोऽभवम्। अतः तवोपकारं सदा स्मरिष्यामि।

साभारः कथासरित्....

# संस्कृतशिक्षा-उत्तराखंडशासनस्य निदेशकसचिवयोः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिना सह उपवेशनं जातम्

गोपालकृष्णमिश्रः

देहली। संवादादातृणा संस्कृत महाविद्यालय-विद्यालय शिक्षक संघ उत्तराखंडस्य प्रान्तीयाध्यक्षेण डॉ राम भूषण बिजल्वाणेन ज्ञापितं यत् कुलपतिना प्रो श्रीनिवासवरखेडीवर्येण सह वार्ताक्रमे ज्ञातं यद् संस्कृत शिक्षा विभागस्य महती: उपलब्धी: उत्तराखंडशासनस्य संस्कृतशिक्षाया: सचिव: श्रीदीपकगैरोला, निदेशक: डॉ आनंद भारद्वाजश्च उपस्थापितवन्तौ । ताभ्यां सह संस्कृतशिक्षाविभागस्य शिष्टमण्डलमपि सम्मिलितम्। तत्र संस्कृत विश्वविद्यालयहरिद्वारस्य प्रो दिनेशशास्त्री उत्तराखंड संस्कृत शिक्षा परिषद: सचिव: डॉ राजेश शर्मा इत्यादिभि: सह अनेके अधिकारिण: समुपस्थिता:। उत्तराखंडे संस्कृत शिक्षाया: उन्नयने संस्कृत विद्यालय-महाविद्यालयानां मूल सुविधाभि: सह विभिन्न मदेषु वित्तीय सहायतां प्रदातुं उत्तराखंड सर्वकारस्य स्वप्नपरियोजना द्वितीय राजभाषा संस्कृतस्य उन्नयनहेतवे उत्तराखंडस्य प्रत्येकस्यां जिल्लायां पञ्चप्राथमिक संस्कृत विद्यालयानाम् उद्घाटनं केंद्रीय संस्कृत विश्वविद्यालय: वित्तीय सहायतानुदानं प्रदास्यति उत्तराखंडे द्वितीय राजभाषा संस्कृतस्य परिकल्पनां सार्थकीं कर्तुं केंद्रीय संस्कृत विश्वविद्यालय दिल्ली द्वारा विभिन्न घटकेभ्यो महतीं वित्तीयसहायतां प्रदातुं सहमती प्रदास्यते।










मन की बात

Advt.

आदमी पैसा क्यों कमाता है ?

1. अपने बच्चों के लिये 2. ऐश के लिये
3. नाम के लिये 4. सेवा के लिये

संत, महात्मा और बुजुर्ग कहते आये हैं :-

- जो मुकद्दर में लिखा है वह जरूर मिलेगा।
- कहते हैं :- जो बीजेंगे सो काटेंगे,
- जो काटेंगे सो खायेंगे, जो खायेंगे सो बन जायेंगे।
- "बोये पेड़ बबूल का, आम कहाँ से खायें।"

आदमी बेईमानी, धोखा व दूसरे को बेवकूफ बना के पैसा कमा लेता है, जबकि उसके मुकद्दर में 100/- रूपया लिखा हुआ था, बेईमानी करके 150/- रूपये कमा लिये। वह कहता है मैंने बड़ी चतुरायी से 50/- रूपये ज्यादा कमा लिये। वही 50/- रूपये घर में बीमारी और कई परेशानियों में लग ही जाते हैं। फिर आदमी कहता है कि मैंने कुछ किया ही नहीं। कहते हैं बिना जुर्म के सजा नहीं मिलती, पाप से कमाई तो कर ली। पंजाबी में कहते हैं :-

"पापाँ बाज न होवे कट्ठी, ते मोयाँ संग न जावे"

पाप के बिना तो फालतू पैसा आयेगा ही नहीं। जब आदमी मरेगा तो साथ कुछ भी नहीं जायेगा। पाप की कमाई से जो घर का सब सामान अपने आपको खुश करने के लिये जोड़ रखा था, जब आदमी मरता है तो वही चीजें उसको देखकर हँसती हैं। मरते समय आदमी माथे पर हाथ मार मार कर रोता है कि मैंने क्यों पाप किये।

"अब पछताये क्या होत, जब चिड़िया चुग गई खेत"

मुझे इतने सालों से काम करते हुए ऐसा महसूस हुआ है कि
"पैसे में सुख दो घड़ी का, सेवा में शांति जिन्दगी भर की"

"जिन्ना लंई तु पाप कमाना, कित्थे गये तेरे घर दे,
टंगा पसार पया विच वेड़े, ते चलो- चलो पे करदे।"

पैसा मैं अपने लिये नहीं कमाता, आप सबके लिये कर रहा हूँ। मैं तो सिर्फ दो रोटी का हकदार हूँ, वो भी आपकी कमाई से। यदि आप भी मेरे जैसा बनना चाहते हो, तो मेरी निम्न छः बातों पर अमल करो।

1. ईमानदार बनन 2. मेहनत करना 3. मीठा बोलना
4. कृपा परम-पिता परमात्मा की 5. आशीर्वाद माता-पिता का 6. प्यार संसार का।


# संस्कृतस्य भव्यः तृतीयोत्कर्षमहोत्सवः सोल्लासं सम्पन्नः

केन्द्रीयसंस्कृतविश्वविद्यालय:, देहली,श्री लालबहादुर शास्त्री राष्ट्रीयसंस्कृत विश्वविद्यालय:, देहली राष्ट्रियसंस्कृत विश्वविद्यालय: , तिरुपति: इत्येतै: संयुक्तरुपेण भारतीय-तकनीकी शिक्षा-परिषद:,( एआईसीटीई ) सभागारे भव्यसंस्कृतस्य तृतीयोत्कर्षस्य महोत्सवस्य समापनसत्रं सोल्लासेन आयोजितम्। अस्मिन् कार्यक्रमे माननीय: भूतपूर्व: कैबिनेटमन्त्री ,श्री महेन्द्रनाथपाण्डेय: , मुख्यातिथि: , सांसद माननीया





बासुंरीस्वराज: प्रो शशिकला गुलाबराव-वंजारी राष्ट्रीय-शैक्षणिक योजना एवं प्रशासन-संस्थानं देहली इत्येते अतिथिरूपेण उपस्थिता:। अध्यक्षरुपेण राष्ट्रियसंस्कृत विश्वविद्यालयस्य कुलपति: प्रो.जी .एस .आर . कृष्णमूर्ति: आसीत्। प्रो.मुरलीमनोहरपाठक: स्वागतं भाषणे स्वीयान् विचारान् प्रास्तौत्। अथ च प्रो. श्रीनिवास-वरखेडी उक्तवान् यत् एष: उत्कर्ष: महोत्सव: वस्तुत: ज्ञानोत्सव: एवासीत्। भारतवर्षस्य अतीते ज्ञाने भविष्यनिर्माणे च संस्कृतस्य अत्यंतं महत्त्वपूर्णा भूमिका भविष्यति। एतदेव कारणमस्ति यत् एनईपी-2020 तमे संस्कृतं केन्द्रे स्थापितमस्ति। प्रो.शशिकला गुलाबराव-वंजारी उक्तवान् यत् विकसिताय भारताय संस्कृतमेव आधार: अस्तिस माननीया बासुंरीस्वराज: उक्तवती यत् संस्कृतस्य उत्पत्ति: भगवत: शिवस्य डक्कनादात् अभवत्। संस्कृतं केवलं कर्मकाण्डस्य मृता वा भाषा न। लैटिनदेशे तु अधुना आङ्ग्लमाध्यमेन पठन्ति किन्तु तत्र संस्कृतस्य अनेका: रचना: लिखिता: सन्ति। कुलसचिवश्श्री सन्तोषकुमारश्रीवास्तव: सर्वेभ्यो धन्यवादं ज्ञापितवान्। सत्रेऽस्मिन् केन्द्रीयसंस्कृत विश्वविद्यालयस्य , भोपाल-परिसर-निदेशकेन प्रो. रमाकान्तपाण्डेयेन संस्कृतभाषाया: आधुनिक-साहित्योपरि 'संस्कृतकथामहोदधीति नाम्ना लिखितस्य एकस्य महत्वपूर्णस्य पुस्तकस्य अपि लोकार्पणं जातम्।

# भगवान् श्रीकृष्णः प्रेम-करुणा-धर्मस्य च प्रतीकः प्रो.मयुरीबेनभाटिया

डॉ.दिनेश चौबे, उज्जयिनी



उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृत-वैदिकविश्वविद्यालयस्य साहित्यविभागस्य तत्वाधानेन श्रीकृष्णजन्माष्टमीमहा-महोत्सवस्यवसरे २६ अगस्ततमे दिनाङ्के भारतीयज्ञानपरम्परायां श्रीकृष्ण: इति विषये विशिष्टव्याख्यानस्य आयोजनं जातम् । मुख्यवक्त्री अहमदाबादनगरस्थितस्य गुजरातविश्वविद्यालयस्य संस्कृतविभागस्य प्रमुखा प्रो.मयूरी बेनभाटियामहोदया भगवत: श्रीकृष्णस्य वेदोपनिषत्पुराणेषु महाभारतादिग्रन्थेषु वर्णितस्य महारूपस्य विशदं सरसं च वर्णनं कृतवती । सा अवदत् यत् श्रीकृष्ण: आदर्शशिष्य:, आदर्शपुत्र: , आदर्शसखा रूपे च पूज्य: वर्त्तते। धर्मस्य रक्षणार्थ कठोरनिर्णयस्य नीति: राष्ट्र रक्षणस्य सन्देश: एव। जगद्गुरु: योगेश्वरश्रीकृष्ण: धर्मस्थापनाया: प्रतीको अस्ति । कुलगुरु: प्रो विजयकुमारसीजीमहोदयेनोक्तं यत् भगवत: श्रीकृष्णस्य प्रभाव: सर्वत्र अस्ति। भागवतपुराणस्य चर्चां कुर्वन् स: अवदत् यत् सत्यस्य धर्मस्य अनन्तज्ञानस्य अनन्तशक्त्या: च मूर्तिमान् रूप: जनार्दन: । स: युगप्रवर्तक: विश्वनायक: च अस्ति। तेन गीताया: ज्ञानं दत्त्वा मानवताया: कल्याणस्य मार्गोद्घाटित: । परिचय: स्वागतभाषणं च कार्यक्रमसंयोजकेन साहित्यविभागप्रमुखेन डॉ. तुलसीदासपरौहामहोदयेन प्रस्तुतम्। सभासञ्चालनं डॉ. खोकनपरामानिकेन मङ्गलाचरणं प्रणवकश्यपेन, धन्यवादज्ञापनञ्च डॉ. गंगाशरणव्यासमहोदयेन कृतम् ।कार्यक्रमे सर्वे विभागाध्यक्षा:, प्राध्यापका:, शोधकर्त्तार:, छात्रा: एवं च सामाजिकजना: समवेता: अभवन् । शान्तिमन्त्रेण सह सभा विसर्जिता।

अस्माकं प्रेरणास्त्रोत:- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्ल:
परामर्शका:-डॉ.बलदेवानन्दसागर:, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैन:
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53त: मुद्रापयित्वा ए-2/32, वजीराबादमार्ग: भजनपुरा, देहली-53 इत्यत: प्रकाशितम्।
दूरभाष : 09311086751 ई-मेल: sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालय: नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।